अत्राहुः—तद्धर्मपर्याप्तावच्छेदकताकविशेष्यताकसाध्यसंशयतावच्छिन्नजन्यतानिरूपितजनकतायास्तद्धर्मपर्याप्तावच्छेदकताकमुख्यविशेष्यतानिरूपितप्रकारतात्वेनावच्छेदिका या प्रकारता तदवच्छेदकतापर्याप्त्यधिकरणरूपवत्त्वमिति विवक्षणान्न कोऽपि दोषः । अनुगमस्तु—प्रकृतसाध्यसंशयीयकोटितानिरूपितविशेष्यताविशिष्टावच्छेदकतावत्प्रकारतावच्छेदकरूपवत्त्वम् । विशेष्यतावैशिष्ट्यं च—स्वघटितसंशयत्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपितत्व—स्वावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नमुख्यविशेष्यतानिरूपितत्वावच्छिन्नत्व—उभयसम्बन्धेन । अतएव नित्यत्वतदभावविषयकज्ञानवानयं नित्यो न वा अयं च नित्यो न वेति समूहालम्बनसंशयजनकतामादायं नित्यो ज्ञानादित्यत्र नातिव्याप्तिः नित्यत्वतदभावविषयकज्ञानवानयं नित्यत्वतदभावविषयकज्ञानवानिति—ज्ञानीयविशिष्टज्ञानत्वावच्छिन्नप्रकारतायामेतत्संशयीयइदन्त्वावच्छिन्नविशेष्यत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वाभावात्, विशिष्टज्ञानवदिदन्त्वावच्छिन्नविशेष्यत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वसत्त्वेऽपि तादृशावच्छेदकतायां विशिष्टज्ञानवदिदन्त्वपर्याप्तावच्छेदकताकविशेष्यतानिरूपितत्वावच्छिन्नत्वाभावादिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तुतस्तु फलीभूतसंशयीयसाध्यतावच्छेदकावच्छिन्नकोटि-
रूपितविशेष्यताविशिष्टा या आधेयत्वसम्बन्धावच्छिन्नावच्छेद-
तन्निरूपितधर्मितावच्छेदकतानिष्ठावच्छेदकतानिरूपितमुख्य-
यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्प्रकारतावच्छेदक-
प्त्यधिकरणरूपवत्त्वमेव विवक्षणीयम् ॥ तादृशकोटितानि-
विशेष्यतावैशिष्ट्यं च स्वावच्छेदकतापर्याप्त्यनुयोगितावच्छे-
धर्मावच्छिन्नानुयोगिताकपर्याप्तिकत्व—स्वघटितसंशयत्वाव-
ष्यतानिरूपितजनकतानिरूपितत्वोभयसम्बन्धेन । समू-
संशयीयविशिष्टज्ञानवदिदन्त्वावच्छिन्नविशेष्यत्वघटितघ-
छिन्नजन्यतानिरूपितजनकतानिरूपितत्वस्येदन्त्ववृत्तितादृशा-
कतायां सत्त्वेऽपि विशिष्टज्ञानवदिदन्त्वावच्छिन्नविशेष्य-
छेदकतापर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगि-
पर्याप्तिकत्वाभावात् तादृशसंशयीयशुद्धेदन्त्वावच्छिन्नविशे-
वच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिता-
पर्याप्तिकत्वसत्त्वेऽपि च तादृशविशेष्यताघटितधर्मावच्छिन्नज-
यतानिरूपितजनकतानिरूपितत्वाभावात् नोक्तसमूहालम्बनसंश-
यमादायातिव्याप्तिः । मुख्यविशेष्यतानिवेशाच्च धूमवत्पर्वतकाली-
नवह्निमान् धूमादित्यादौ न प्रागुक्तातिव्याप्तिः ।

केचित्तु—फलीभूतसंशयीयसाध्यतावच्छेदकावच्छिन्नकोटिता-
निरूपितविशेष्यतावच्छेदकता यादृशधर्मे पर्याप्ता तादृशधर्मावच्छिन्नमुख्यविशेष्यताविशिष्टा या तद्विशेष्यताशालिसंशयत्वाव-
च्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतप्रकारता तदवच्छेदक-
तापर्याप्त्यधिकरणरूपवत्त्वमिति । निरुक्तमुख्यविशेष्यतावैशिष्ट्यञ्च
स्वनिरूपितत्व—स्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन ।
भेदप्रतियोगितावच्छेदकत्वं च स्वनिरूपितावच्छेकतापर्याप्त्यधिक-
रणधर्मावच्छिन्नावच्छेदकताकत्वसम्बन्धेन, नित्यत्वतदभावाविष-
यकज्ञानवानयं नित्यत्वतदभावविषयकज्ञानवान्—इति ज्ञानीयविशिष्ट-
ज्ञानत्वावच्छिन्नप्रकारता तु न निरुक्तमुख्यविशेष्यताविशिष्टेति
नोक्ताऽतिव्याप्तिः । न च यत्वतत्वनिवेशादननुगमः, साध्यतावच्छे-
दकावच्छिन्नकोटितानिरूपितविशेष्यताविशिष्टप्रकारतावच्छेदकरू-
पवत्त्वे तात्पर्यात् । विशेष्यतावैशिष्ट्यं च स्वघटितसंशयत्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व स्वावच्छेदकतापर्याप्त्य
करणधर्मावच्छिन्नमुख्यविशेष्यतावत्त्वोभयसम्बन्धेन । उक्तसम्ब
घटकमुख्यविशेष्यतावत्त्वं च प्रागुक्तोभयसम्बन्धेन । मुख्यविशे
ताव्यावृत्तिस्तु पूर्ववदित्याहुः ।

यदि च वक्ष्यमाणयुक्त्या साधारणादिधर्मवत्ताज्ञानज
वच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशश्चौव्ये प्रयोजनविरहे
शयत्वस्य जन्यतानवच्छेदकतयाऽसंभव इत्युच्यते, त
गुक्तोभयसम्बन्धघटकीभूतस्वघटितसंशयत्वावच्छिन्नजन्यता
तत्वमपहाय स्वविशिष्टविशेष्यताशून्यसाध्यसंशयनिष्ठज
रूपितजनकतानिरूपितत्वघटितोभयसम्बन्धेनैव विशेष्यतावै
विवक्षणीयम् ॥ उक्तसम्बन्धघटकस्ववैशिष्ट्यं च स्वभिन्नत्व-
च्छिन्नत्व-स्वनिरूपकज्ञानीयत्व-एतत्त्रितयसम्बन्धेन इति ध्येय

केचित्त्वित्यादिकल्पेऽपि स्वघटितसंशयत्वावच्छिन्नजन्यत
रूपितजनकतावच्छेदकत्वमपहाय उक्तत्रितयसम्बन्धेन स्ववि
ष्ठमुख्यविशेष्यताशून्यसाध्यसंशयनिष्ठजन्यतानिरूपितजनकतावच्छे
दकत्वं निवेशनीयमिति संक्षेपः ॥ २ ॥

जनकता च साध्यसंशयत्वावच्छिन्नजन्यतानिरूपिता ग्राह्या,
अतः सम्बन्धान्तरज्ञानजन्यकोट्युपस्थितेर्विशेषणज्ञानमुद्रया सा-
ध्यसंशयजनकत्वेऽपि न क्षतिः । यदि चासाधारणधर्मादिज्ञानज-
न्यसंशये व्यभिचारवारणाय साधारणादिज्ञानजन्योपस्थितिजन्य-
तावच्छेदककोटौ तादृशोपस्थित्यव्यवहितोत्तरत्वानिवेशस्यावश्यक-
तया साध्यसंशयत्वं तत्र प्रयोजनाविरहेण न निवेश्यते, तदा साध्य-
संशयत्वावच्छिन्नत्वं परित्यज्य साध्यसंशयत्वन्यूनवृत्तित्वमेव निवे-
शनीयम् । विशेषणज्ञानादिजन्यता च न तन्न्यूनवृत्तिरिति नातिप्र-
सङ्गः । न चैवमपि यत्र नित्यत्वतदभावविषयकज्ञानवानयं नित्य-
त्वतदभावसहचरितप्रमेयत्ववांश्चायमित्याकारकज्ञानाभ्यां नित्यत्व-
तदभावविषयिणी एकैवोपस्थितिर्जनिता तत्र तादृशोपस्थितिजन-
कपक्षधर्मताज्ञानविषयत्वमादाय ज्ञानेऽतिव्याप्तिर्दुर्वारैव तादृशोपस्थि-
तिव्यक्तेः साधारणादिधर्मवत्ताज्ञानजन्यतया साध्यसंशयत्वावच्छि-
न्नं प्रति जनकत्वादिति वाच्यम् । साध्यसंशयत्वावच्छिन्नजन्यतानि-
रूपितजनकतानियतजन्यतानिरूपकीभूतजनकताया एव पक्षधर्मता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ानविशेषणत्वोपगमात् नित्यत्वतदभावविषयकज्ञानवत्ताज्ञान-
यता च न तादृशजनकतानियतेति भट्टाचार्येणोक्तम्।

(अथात्रोक्तयुक्त्या साधारणादिधर्मवत्ताज्ञानजन्यतावच्छेदककोटि-
यवहितोत्तरत्वनिवेशस्यावश्यकतया तादृशज्ञानजन्यत्वस्य सा-
धयाजनकतादृशज्ञानाव्यवहितोत्तरघटज्ञानादिसाधारणतया
संशयजनकताव्यभिचारित्वेनासंभवापत्तिरिति चेत्।

ाहुः—साध्यसंशयजनकतानियतत्वं न तादृशजनकताशू-
त्वं येनाऽसंभवः स्यादिति, किन्तु तादृशजनकताशून्य-
दभावविषयकोपस्थित्यवृत्तित्वरूपमेव वाच्यम्। तथाच
णादिधर्मवत्ताज्ञानजन्योपस्थितिमात्रस्यैव साध्यसंशय-
ात्वेन तादृशजनकताशून्यत्वमसाधारणादिधर्मवत्ताज्ञानज-
स्थितावेवेति तादृशोपस्थित्यवृत्तित्वस्य साधारणधर्मवत्ता-
जन्यतायामक्षतत्वान्न दोषः॥ अथवा तादृशजनकतानिय-
—स्वव्यापकतादृशजनकताकत्वम्। स्वपदं तादृशजनकतानिय-
त्वाभिमतजन्यतापरम्। स्वव्यापकत्वं च स्वाधिकरणीभूतसाध्य-
तदभावविषयकोपस्थितिनिष्ठभेदप्रतियोगितानवच्छेदकत्वम्, तथाच
नित्यत्वतदभावविषयकज्ञानजन्यतायाः साध्यसंशयाजनकसाध्य-
तदभावविषयकोपस्थितावपि सत्त्वेन साध्यसंशयजनकतायां तादृ-
शज्ञानवत्ताज्ञानजन्यताशालितदभावविषयकोपस्थितिनिष्ठभेदप्रति-
योगितानवच्छेदकत्वाभावान्नातिव्याप्तिः। साधारणादिधर्मवत्ताज्ञा-
नजन्यताशालिसाध्यतदभावविषयकोपस्थितिमात्र एव च साध्यसं-
शयजनकतासत्त्वात् नोक्ताऽसंभवः। एतेन पूर्वकल्पे विशेषण-
ज्ञानादिमुद्रया साध्यसंशयजनकताशून्यसाध्यतदभावविषयकोप-
स्थित्यप्रसिद्धयैव विशेषणज्ञानादिमुद्रया जनकतामादायातिप्रसङ्गा-
भावात् जन्यतायां(१) साध्यसंशयत्वावच्छिन्नत्वं-साध्यसंशयत्वन्यू-
नवृत्तित्वं वा व्यर्थमिति परास्तम्। एतत्कल्पे विशेषणज्ञानादिमुद्रया
जनकतायामपि निरुक्तस्य नित्यत्वतदभावविषयकज्ञानवत्ताज्ञान-
जन्यत्वव्यापकत्वस्य सत्त्वेनोक्तातिव्याप्तिवारणायैव तत्सार्थक्या-
दिति ध्येयम्॥

---

(१)यत्किञ्चिज्जनकतानियतजन्यतानिवेशेनासंभववारणसंभवात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परेतु अवच्छेदकतासम्बन्धेन नियतत्वप्रवेशान्न कोपि दो
इत्याहुः ॥ तच्चिन्त्यम् । अथवेत्यादिउक्तकल्पस्यापि फलतस्तत
कतया सन्दर्भविरोधादिति ॥

केचित्तु उक्ताऽसम्भवभिया साध्यसंशयजनकताव्याप
मेव निवेशनीयम् नित्यत्वतदभावविषयकज्ञानजन्यता च न
शजनकतायास्तादृशज्ञानवत्ताज्ञानाजन्योपस्थितावपि सत्त्वात
च तादृशजनकतायाः साधारणधर्मवत्ताज्ञानाजन्यासाधार
त्ताज्ञानादिजन्योपस्थितावपि सत्त्वात् साधारणधर्मवत्ता
तायामपि तादृशजनकताव्यापकत्वं दुर्घटमिति वाच्यम्
पकतासम्बन्धेन तादृशजनकताविशिष्टजन्यताया एव
नीयत्वात् इत्याहुः ॥ (१)तच्चिन्त्यम् ॥ न च तथापि धूमव
र्वतो वह्निमान् न वेत्यादिसंशयत्वावच्छिन्नजन्यतानिरूपित
दूधूमवान्पर्वत इत्याकारकधर्मितावच्छेदकप्रकारकज्ञानीयजन
तन्नियता या धूमविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन
तन्निरूपकजनकताशालि—पर्वतो धूमवानित्यादिपक्षधर्मताज्ञा
विषयत्वमादाय विशिष्टवैशिष्ट्यावगाहि-अनुभवत्वावच्छिन्नजन्यता
यां स्मृतिसाधारणधर्मितावच्छेदकप्रकारकज्ञानजनकताव्यापकत्वा-
भावेन तादृशजनकताव्यापकतानिवेशपक्षे धूमादावतिप्रसङ्गाभावेऽ-
पि तादृशजन्यताव्याप्यत्वनिवेशकल्पेऽतिप्रसङ्गो दुर्वार एवेति वा-
क्यम् । एतत्समाधानस्याग्रे वक्ष्यमाणत्वात् ॥ ३ ॥

अथवा उक्तातिप्रसङ्गवारणाय तादृशजनकतावच्छेदकावच्छि-
न्नत्वमेव जनकतायां निवेशनीयम् , अव्यवहितोत्तरत्वसम्बन्धेन सा-
धारण्यादिविशिष्टधर्मवत्ताज्ञानविशिष्टतत्तत्कोट्युपस्थितित्वरूपता-
दृशज्ञानजन्यतावच्छेदकधर्म एव संशयजनकतावच्छेदकः न तु ता-
दृशज्ञानजन्यतत्कोट्युपस्थितित्वं जन्यतापेक्षया तद्घटकस्याव्यव-
हितोत्तरत्वस्य लघुत्वादत आत्माश्रयेण साधारणादिधर्मवत्ताज्ञा-
नजन्यत्वस्य तादृशज्ञानजन्यतानवच्छेदकत्वेऽपि न क्षतिरिति
भट्टाचार्येणोक्तम् ॥

---

(१)अत्रापि निरुक्तरीत्या संशयत्वावच्छिन्नप्रवेशो व्यर्थ इति चिन्ताबीजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथात्र संशयजनकताच्छेदककोटौ साधारणादिधर्मवत्धर्मि-
नजन्यत्वस्य प्रवेशेऽपि न क्षतिः प्रकृते संशयजनकतावच्छेदक-
कोटिप्रविष्टा या साधारणादिधर्मवत्ताज्ञानजन्यता तद्घटकाव्य-
वहितोत्तरत्वपर्याप्तावच्छेदकताकजन्यतानिरूपिता या साधारणा-
दिधर्मवत्ताज्ञाननिष्ठजनकता तदाश्रयपक्षधर्मताज्ञानविषयत्वमादायैव
लक्षणसमन्वयादिति । न च जनकतावच्छेदकताया यदि
निविश्यते तदाऽसंभवः क्षतिरिति वाच्यम् । जनकताव-
च्छेदकतायाश्च पर्याप्तिर्न निवेश्यते इति स्वयमेवोक्तत्वात् इति
भावः ॥

उच्यते–जन्यताया अव्यवहितोत्तरत्वघटितत्वमत एव तदपेक्षया
गुरुत्वेन तद्घटकाव्यवहितोत्तरत्वस्य संशयजनकतावच्छेदकत्वो-
पपत्तिः अन्यथा जन्यताया अतिरिक्तत्वे जन्यतापेक्षयाऽव्यवहि-
तोत्तरत्वस्य लघुत्वाभावेन जन्यताया जनकतावच्छेदकत्वखण्ड-
नापत्तिप्रसक्त्यापत्तेः । एवञ्च जन्यतापेक्षया तद्घटकाव्यवहितोत्तर-
त्वस्य लघुत्वादिति ग्रन्थेन जन्यत्वं नातिरिक्तपदार्थः किन्त्वव्यवहि-
तोत्तरत्वघटितमेवेति ज्ञापनात् । अत एव आत्माश्रयेत्यादिग्रन्थस्य
यतो जन्यताया नातिरिक्तत्वम् अतः आत्माश्रयभयेन तस्या जन्यता-
नवच्छेदकत्वेऽपि न क्षतिर्नाऽसंभवः, अन्यथा जन्यताया अतिरिक्तत्वेऽ-
संभवरूप एव क्षतिरित्यर्थ एव तात्पर्यम्, न तु अत एव जन्यत्वस्य
स्वघटकाव्यवहितोत्तरत्वाऽपेक्षया गुरुत्वेन संशयजनकतानवच्छे-
दकत्वादेव न क्षतिर्नाऽसंभव इत्यर्थ इति न कुत्राप्यनुपपत्तिरिति
ध्येयम्(१) ॥ ४ ॥

न चैवं साध्यसंशयत्वनिवेशनं व्यर्थं यत्किञ्चिज्जनकतावच्छे-
दकावच्छिन्नजन्यतानिवेशेनैवोपपत्तेः, नित्यत्वतदभावविषयकज्ञा-
नवत्ताज्ञानजन्यतावच्छेदकत्वस्याव्यवहितोत्तरत्वसम्बन्धेन तादृशज्ञा-

---

(१) वस्तुतस्तु उपस्थितित्वस्य साधारणादिधर्मवत्ताज्ञानज-
न्यतावच्छेदककोटौ प्रवेशपक्ष एवैतदुक्तत्वात् तत्पक्षे जनकतावच्छे-
दककेवलस्मृतित्वमादायातिप्रसङ्गभिया उभयत्रैव पर्याप्तिनिवेशस्या-
वश्यकतयाऽव्यवहितोत्तरत्वघटितजन्यत्वजनकतावच्छेदकत्वेपि क्ष-
तिसंभवादिति ध्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नविशिष्टनित्यत्वादिविषयकोपस्थितित्वस्य किञ्चित्कार्यं प्रति जन
कतावच्छेदकत्वाभावेनाऽतिप्रसङ्गाभावादिति वाच्यम्। तथास
वह्न्यादौ साध्ये रासभसाहचर्यादिप्रकारताज्ञानमादाय धूमादाव
प्रसंगापातात् प्रकृतसाध्यसंशयजनकताया अवश्यं निवेशनीय
दिति भट्टाचार्येणोक्तम् ॥

अथात्र प्रागुक्तयुक्त्या प्रकृतसाध्यसन्देहजनकतापदेन प्र
ध्यसंशयत्वन्यूनवृत्तिजन्यतानिरूपितजनकत्वमेव विवक्षणीय
न्यूनवृत्तित्वं यदि प्रकृतसाध्यसन्देहनिष्ठभेदप्रतियोगितावच्
सति तादृशसंशयनिष्ठत्वरूपं तदा साध्यसंशयत्वोपादानेऽपि
तदभावसाहचर्यादिप्रकारकज्ञानजन्यतामादायातिव्याप्तितादव
रासभतदभावसहचरितधर्मवत्ताज्ञानजन्यकोट्युपस्थितिजन्य
कसाध्यसंशयत्वन्यूनवृत्तित्वस्याक्षतत्वात्। नाऽपि साध्यसंश
व्याप्यत्वमेव तन्न्यूनवृत्तित्वं—साध्यतदभावसहचरितधर्मवत्ता
जन्यकोट्युपस्थित्यव्यवहितोत्तरघटादिज्ञानसाधारणतादृशोपा
तिजन्यतायामपि साध्यसंशयत्वव्याप्यत्वाभावादिति चेत्।

अत्रोच्यते—साध्यसंशयत्वन्यूनवृत्तित्वं साध्यसंशयानिष्ठभेदप्र
तियोगितावच्छेदकत्वे सति मुख्यविशेष्यताद्वयशून्यसाध्यसंशयनि
ष्ठत्वम्, रासभादिसंशयत्वावच्छिन्नजन्यतायाश्च मुख्यविशेष्यताद्वय
शून्यसाध्यसंशयनिष्ठत्वाऽभावान्न निरुक्तन्यूनवृत्तित्वम्। यदि च
संशये विशेष्यताद्वयमेव स्वीक्रियते, तदा स्वभिन्नत्व-स्वानवच्छिन्न
त्व-स्वनिरूपकज्ञानीयत्वैतत्त्रितयसम्बन्धेन मुख्यविशेष्यताविशिष्ट
मुख्यविशेष्यताशून्यसाध्यसंशयनिष्ठत्वमेव न्यूनवृत्तित्वघटकं वा
च्यमिति। इदमपि संशयीयविशेष्यताद्वयस्यावच्छेद्यावच्छेदक
भावमभ्युपेत्य।

वस्तुतस्तु किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छे
दकावच्छिन्नप्रकारतानन्तः(१)पातित्वे सति किञ्चिद्धर्मावच्छिन्नविशे
ष्यतानिरूपितसाध्याभावत्वावच्छिन्नविषयतानन्तःपातिनी या वि
षयता तच्छून्यसंशयनिष्ठत्वमेव न्यूनवृत्तित्वघटकं वक्तव्यमतो न
काप्यनुपपत्तिरिति ध्येयम् ॥ ५ ॥

(१) अव्यापकत्वे सतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च कोटिद्वयपदस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नतदभाव-
तया प्रकृतसाध्यतावच्छेदकावच्छिन्नादिविषयकोपस्थितित्वघटि-
तावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिवेशान्नायमतिप्रस-
ङ्गः वाच्यम्। एवं सत्येतल्लाभायैव साध्यसंशयोपादानमिति
आर्यणोक्तम्।

अत्रेदमवधेयम्-प्रकृतसाध्यतावच्छेदकावच्छिन्नादिविषयकोप-
स्थितित्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतापदेन
साध्यविषयकोपस्थितित्वघटितधर्मावच्छिन्नजनकतावच्छेद-
कावच्छिन्नजन्यता प्रकृतसाध्याभावोपस्थितित्वघटितधर्मावच्छिन्न-
जनकतावच्छेदकावच्छिन्नजन्यता च वक्तव्या तत्रोभयदिशि जन-
कतायामेव प्रकृतसाध्यसंशयानिरूपितत्वमवश्यं निवेशनीयमिति,
अन्यथा प्रथमजनकतायां तदनिवेशे गोत्ववानश्वत्वादित्यादिविरुद्धे
कालिकेन गोत्वकोटिकसंशयस्य साध्यताघटकसमवायसम्बन्धेन
प्रकृतसाध्याभावकोटिकसंशयस्य च जनकीभूतकोट्युपस्थितिजन-
कत्वकालिकेन गोत्ववद्वृत्तिसमवायसम्बन्धावच्छिन्नप्रतियोगिताक-
गोत्वाभाववद्वृत्ति-अश्वत्ववदिदमित्यादिज्ञानमादायातिव्याप्तिः। एवं
द्वितीयादिजनकतायां तदनिवेशेऽपि वह्निमान् धूमादित्यादौ व्याप्ये
संयोगेन वह्निमद्वृत्ति कालिकेन वह्न्यभाववद्वृत्तिधूमवानित्यादिज्ञान-
मादायातिव्याप्तिरिति कथमुक्तमेतल्लाभायैव संशयपदोपादानादिति।
न चोभयत्र जनकतायामेव साध्यतावच्छेदकसंसर्गावच्छिन्नकोटिता-
कसंशयनिरूपितत्वमात्रनिवेशेनैव उक्तातिप्रसङ्गवारणसंभवे संशये
प्रकृतसाध्यीयत्वखण्डन एवैतत्ग्रन्थस्य तात्पर्यमिति वाच्यम्।
विशेषणतया घटत्वाभावसाध्यकघटत्वादिविरुद्धहेतौ कालिकेन
घटत्वाभावकोटिकस्य विशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकघ-
टत्वाभावाभावकोटिकसंशयस्य साध्यताघटकसम्बन्धेन प्रकृतसा-
ध्याभावकोटिकसंशयस्य च जनकीभूतकोट्युपस्थितिजनकं कालि-
केन घटत्वाभाववद्वृत्तिविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकघट-
त्वाभावाभाववद्वृत्तिघटत्ववानित्यादिज्ञानमादायातिव्याप्तिवारणाय प्र-
थमजनकतायां विशेषणतया धूमाभावसाध्यकवह्न्यभावादिरूपव्याप्य-
हेतौ कालिकेन संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावाभाव-
त्वावच्छिन्नविशेषणतावच्छिन्नप्रतियोगिताकाभावकोटिसंशयस्य वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषणतया प्रकृतसाध्यकोटिकसंशयस्य च जनकीभूतकोट्युपस्थिति
जनकं कालिकेन धूमाभावाभाववद्वृत्तिनिर्धूमवति वह्न्यभाववानयं
त्यादिज्ञानमादायातिव्याप्तिवारणाय द्वितीयजनकतायां च प्रकृत
ध्यसंशयनिरूपितत्वनिवेशस्याप्यावश्यकत्वात्। अत एवैतदति
सिभिर्यैव यदि चेत्यादिनाऽभिधास्यमाने एतत्कल्पसमशीलि
यकल्पे संशयपदद्वयोपादानं स्वयमेव करिष्यतीति चेत्।

अत्र केचित्—उभयकोटिसाहचर्यावच्छिन्नप्रकारताशा
जन्यकोट्युपस्थितेरेव संशयजनकत्वं न तु प्रत्येकसा
वच्छिन्नप्रकारताशालिज्ञानजन्यकोट्युपस्थितेरिति मने उ
प्रसङ्गाभावात् तन्मतमालम्ब्यैवैतल्लाभायेत्यादिग्रन्थाभिधा
सङ्गतिरित्याहुः॥

वस्तुतस्तु वक्ष्यमाणसहकारितावच्छेदकनिवेशे निष्कृष्टक
भिप्रायेणैवैतद्ग्रन्थोऽभिहितः। तत्कल्पे साध्यसंशयनिवेशस्य
योजकत्वात् इति ध्येयम॥ ६॥

अथ वह्निसाहचर्यमात्रेण वह्न्यभावसाहचर्यमात्रेण वाऽवच्छि
या व्याप्यस्य विरुद्धस्य वा प्रकारता तस्याश्चोद्बोधकान्तरवशात्
साध्यतदभावविषयकसमूहालंबनरूपसाध्यतदभावोपस्थितिजनकी-
भूतज्ञानीयतया प्रत्येकं साध्योपस्थितिनिष्ठजन्यतानिरूपितजन-
कतायां साध्याभावोपस्थितिनिष्ठजन्यतानिरूपितजनकतायां चाव-
च्छेदकत्वेनातिप्रसङ्गः। यदि च साध्यविशेषणकोपस्थितिवृत्तिसा-
ध्यसंशयजनकतानियतं यज्जन्यत्वं तन्निरूपितायां तादृशोपस्थित्य-
वृत्तिसाध्यसंदेहजनकतानियतं यज्जन्यत्वं तन्निरूपितायां च जनक-
तायामवच्छेदकीभूता या प्रकारता तस्या विवक्षितत्वान्नातिप्रसङ्ग
इति भट्टाचार्यैणोक्तम्॥

अत्र कल्पे प्रथमं साध्यसंशयपदं जनकतायां साध्यसं-
शयत्वावच्छिन्नजन्यतानिरूपितत्वलाभाय द्वितीयमपि तदर्थमे-
वान्यथा गोत्ववान् अश्वत्वादित्यादिविरुद्धे वह्निमान् धूमादि-
त्यादिव्याप्ये च गोत्वाभाववद्वृत्ति-द्रवत्ववद्वृत्ति-अश्वत्ववानि-
त्यादिज्ञानीयप्रकारतामादाय वह्निमद्वृत्तिवह्न्यभावाभाववद्वृत्तिधूम-
वानित्यादिज्ञानीयप्रकारतामादाय चातिव्याप्त्यापत्तेः। के-
वलसाध्यसहचरितहेतुमत्ताज्ञानजन्यतायां केवलसाध्याभावसहच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेतहेतुमत्ताज्ञानजन्यतायां च समूहालम्बनसाध्यतदभावो-
स्थितौ साध्यविषयकोपस्थितित्वावच्छिन्नजनकतायाश्च सामा-
नाधिकरण्याद्व्याप्यविरुद्धयोरतिव्याप्तिरतो नियतपदद्वयम्। न च
पक्षजनकतासामानाधिकरण्यनिवेशेनैव पूर्वोक्तदोषवारणसंभवे-
नियतपदद्वयेनेति वाच्यम्। वह्निसहचरितमीनसहचरितजल-
नजन्यसमूहालम्बनोपस्थितौ तादृशजनकतासमानाधिकरण-
चरितवत्ताज्ञानजन्यतामादाय वह्निमान् जलादित्यादिवि-
हालम्बनोपस्थितौ तादृशजनकतासमानाधिकरणरासभस-
धूमवत्ताज्ञानजन्यतामादाय वह्निमान् धूमादित्यादिव्याप्ये चा-
प्तिरतो नियतपदद्वयम्(१)।

थ साध्याविशेषणकोपस्थितिपदेन साध्यतावच्छेदकावच्छि
शेषणताशून्योपस्थितिरेव वाच्या अन्यथा साध्यनिष्ठविशे-
ताशून्योपस्थितेरप्रसिद्ध्या प्रमेयसाध्यकव्यभिचारिण्यव्याप्त्या-
, एवं च स्वरूपतो द्रव्यत्वादिसाध्यकस्थले साध्यतावच्छे-
प्रसिद्ध्याऽव्याप्तिः(२)। न च स्वरूपतो द्रव्यत्वसाध्यकस्थले
साध्यनिष्ठविशेषणताशून्योपस्थितिरेव निवेशनीया तथाच द्रव्य-

---

(१) अत्र तादृशवृत्तित्वं जनकतायां न तु जन्यतायां तथासति वह्न्यभावसहचरितजलवत्ताज्ञानजन्यताया घटज्ञानादिसाधारणतया साध्याविशेषणकोपस्थितिवृत्तित्वेन साध्याभावोपस्थितित्वावच्छिन्नजनकतासमनियततया च तादृशजन्यतामादाय वह्निमान् जलादितिविरुद्धेऽतिव्याप्तिरतः साध्याविशेषणकोपस्थितिवृत्तित्वं जनकतायां निवेश्यम्। एवं साध्याविशेषणकोपस्थित्यवृत्तित्वस्य जन्यतायां निवेशेऽसम्भवः सर्वस्या एव जन्यताया घटज्ञानादिसाधारणतया तादृशावृत्तित्वाभावादिति॥

(२) न च साध्यतावच्छेदकसम्बन्धेन वृत्तिसाध्यनिष्ठत्वनिवेशान्नाप्रसिद्धिरिति वाच्यम् तथासति वह्नित्वेन घटावगाहिवह्न्यभावोपस्थितित्वावच्छिन्नजनकतामादाय विरुद्धेऽतिव्याप्तेर्दुर्वारत्वात्। न च तथापि साध्यनिष्ठमुख्यविशेष्यतामिव मुख्यविशेष्यताशून्यत्वनिवेशान्नातिव्याप्तिरिति वाच्यम् वह्न्यभावत्वेन वह्न्यवगाह्युपस्थितिमादाय तत्रातिव्याप्तेः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वसहचरितधर्मवत्ताज्ञानजन्यद्रव्यत्वमित्याकारकोपस्थितेरेव ता
शत्वान्नानुपपत्तिरिति वाच्यम्। द्रव्यत्वमित्याकारकोपस्थितेर
द्रव्यत्वत्वघटकतया स्वरूपतो द्रव्यत्वविशेषणकत्वादिति चेत्

उच्यते-स्वरूपतो द्रव्यत्वादिसाध्यकस्थले साध्यावच्छिन्न
शेषणताशून्योपस्थितिरेव निवेशनीया तत्तदभावसहचरितध
ज्ञानजन्योपस्थितिवत् तत्तदन्योन्याभाववद्वृत्तिधर्मवत्
नजन्योपस्थितेरपि संशायकतया उक्तस्थले द्रव्यतदन्यवृत्ति
नित्याकारकज्ञानजन्यद्रव्यमित्याकारकोपस्थितिमादायैव ल
मन्वयादिति ध्येयम् ॥

अथ साध्यसंशयत्वावच्छिन्नजन्यतानिरूपितजनकता
ष्टप्रकारताविवक्षणेनैव सामञ्जस्ये प्रत्येकसाहचर्यमात्रावच्छिन्न
रताकज्ञानजन्योद्बोधकान्तराधीनसाध्यतदभावविषयकसमूहा
नोपस्थितिजनकतामादायातिव्याप्तिवारणसम्भवेन साध्याविशे
केत्यादिगुरुतरारम्भो निष्फलः ॥ जनकतावैशिष्ट्यं च स्व
यतजन्यतानिरूपितजनकतावच्छेदकत्व-स्वभिन्नसाध्यसंशयजनक
तानियतजन्यतानिरूपितजनकतावच्छेदकत्वोभयसम्बन्धेन इति
चेन्न। स्वरूपसम्बन्धात्मकजनकताया उपस्थितिभेदेन भिन्नत्वे
उक्तसमूहालम्बनोपस्थितिमादायोक्तातिव्याप्तितादवस्थ्यात् (१)उक्त-
परम्परायाः संसर्गत्वे मानाभावाच्चेति ध्येयम्।

अथात्राश्वत्ववान् गौर्न वेत्यादिसंशयत्वावच्छिन्नजन्यतानिरूपि-
तसाध्यविशेषणकोपस्थितिवृत्तिधर्म्मितावच्छेदकप्रकारकज्ञानत्वाव-
च्छिन्नजनकतानियतं यदश्वत्वविशिष्टवैशिष्ट्यावगाहिबुद्धित्वाव-
च्छिन्नजन्यत्वं तन्निरूपितजनकतायां साध्याविशेषणकोपस्थित्यवृत्ति-
साध्यसंशयजनकतानियतजन्यतानिरूपितजनकतायां चावच्छेदकी-
भूता या गोत्वाभाववद्वृत्त्यश्वत्ववानित्यादिज्ञानीयप्रकारता तामादाय
गौरश्वत्वादित्यादिविरुद्धे वह्न्यभावकालीनधूमवान् वह्निमान् वेत्या-
दिसंशयत्वावच्छिन्नजन्यतानिरूपितसाध्याविशेषणकोपस्थित्यवृत्ति-

(१) स्वावच्छेदकावच्छिन्नभिन्नत्वनिवेशे न दोष इत्यत आह-
उक्तेति। मानाभावः विनिगमनाविरहेण जनकता नाना तथा चा-
न्यजनकतामादायातिव्याप्तिरिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्म्मितावच्छेदकप्रकारकज्ञानत्वावच्छिन्नजनकतानियतं यद्वह्न्यभा-
कालीनधूमविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यत्वं तन्नि-
तजनकतायां साध्याविशेषणकोपस्थितिवृत्तिसाध्यसंशयजन-
नियतजन्यतानिरूपितजनकतायां चावच्छेदकीभूता या वह्नि-
त्तिवह्न्यभावकालीनधूमवानित्याद्विज्ञानीयप्रकारता तामादाय
न्धूमादित्यादिव्याप्ये चातिव्याप्तिः। न च द्वितीयजन्यतायां
शेष्यत्वावच्छिन्नत्वनिवेशान्नायमतिप्रसङ्गः विशिष्टवैशिष्ट्या-
बुद्धित्वावच्छिन्नजन्यतायां मुख्यविशेष्यत्वावच्छिन्नत्वाभावा-
प्र
शाच्यम्। तावतापि वह्न्यभावकालीनधूमवान् पर्वतो वह्नि-
त्यादिसंशयत्वावच्छिन्नजन्यतानिरूपितधर्मिताच्छेदकप्रकार-
ज्ञानत्वावच्छिन्नजनकतानियतं यद्विशिष्टानुयोगिकवैशिष्ट्या-
हिबुद्धित्वावच्छिन्नजन्यत्वं तन्निरूपितजनकतावच्छेदकीभूतवह्नि
त्तिवह्न्यभावकालीनधूमवान् पर्वत इत्यादिज्ञानीयप्रकारतामादाय
मान् धूमादित्यादिव्याप्ये एवंरीत्या विरुद्धे चातिव्याप्तेर्दुर्वार-
दिति चेन्न। द्वितीयजन्यतायामनुभवत्वानवच्छिन्नत्वस्य ज्ञाना-
वच्छिन्नत्वस्य वा निवेशेनैवोक्तातिव्याप्त्यसम्भवादिति। न च
तथापि वह्न्यभावकालीनालोकवान् पर्वतो वह्निमान्न वेत्यादिसंश-
यत्वावच्छिन्नजन्यतानिरूपितसाध्याविशेषणकोपस्थित्यवृत्तिधर्मिता-
वच्छेदकप्रकारकज्ञानत्वावच्छिन्नजनकताया नियतं यत्पर्वतो वह्न्य-
भावकालीनालोकवानित्याकारकानुमितित्वावच्छिन्नपरामर्शजन्य-
त्वं तन्निरूपितजनकतायां साध्याविशेषणकोपस्थितिवृत्तिसाध्यसं-
शयजनकतानियतजन्यतानिरूपितजनकतायां चावच्छेदकीभूता
या वह्निमद्वृत्तिवह्न्यभावकालीनालोकव्याप्यधूमवानित्यादिज्ञानी-
यप्रकारता तामादाय व्याप्यादावतिव्याप्तितादवस्थ्यमेव परामर्शज-
न्यतायां परामर्शात्मकज्ञानावच्छिन्नत्वसत्त्वादिति वाच्यम्। परामर्श-
जन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशावश्यकतया प्रयोजन-
विरहेणानुमितित्वाद्यप्रवेशेन परामर्शजन्यत्वस्य परामर्शोत्तरवर्त्तिसं-
शयाजनकज्ञानादावपि सत्त्वेन परामर्शजन्यतायां साध्यसंशयज-
नकतानियतत्वाभावादेवोक्तातिव्याप्तेरनवकाशादिति ध्येयम्॥

यत्तु द्वितीयजन्यतायां स्मृतित्वावच्छिन्नत्वनिवेशान्नोक्तातिप्रसङ्ग
इति॥ तत्तुच्छम्-साधारणादिधर्मवत्ताज्ञानजन्यतावच्छेदककोटा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वव्यवहितोत्तरत्वस्य निवेशावश्यकतया स्मृतित्वस्य जन्यतानवच्छे
दकत्वादिति । स्मृतित्वस्य जन्यतानवच्छेदकत्वे संशयाजनकज्ञानस
धारण्यां साधारणादिधर्मवत्ताज्ञानजन्यतायां यथा संशयजनक
नियतत्वं तथोपपादितं प्रागेव ॥ ७ ॥

एतदस्वरसेनैव वा—साध्याभावविषयकत्वघटितधर्मावचि
संशयजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितायां तादृशधर्म
च्छिन्नसाध्यविषयकत्वघटितधर्मावच्छिन्नसंशयजनकतावच्छे
च्छिन्नजन्यतानिरूपितायां च जनकतायामवच्छेदिका या प्र
तस्या वा निवेशान्नोक्तदोष इति कल्पान्तरमुक्तं भट्टाचार्येण

एतत्कल्पे संशयपदद्वयोपादानव्यावृत्तिः प्रागेव विहि
अथात्र साध्याभावविषयकत्वघटितधर्मानवच्छिन्नजनकतानिवे
सामञ्जस्ये तादृशजनकतायां साध्यविषयकत्वघटितधर्मावच्छि
निवेशो व्यर्थः । न चाश्वत्ववद् भूतलं गोत्ववन्न वेत्याकारकसंशयं
या साध्याभावविषयकत्वघटितधर्मावच्छिन्नधर्मितावच्छेदकप्रका
ज्ञानत्वावच्छिन्नजनकता तदवच्छेदकधर्मावच्छिन्नाश्वत्वविशिष्ट
शिष्ट्यावगाहित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूता य
गोत्वाभाववद्वृत्त्यश्वत्ववानिति-ज्ञानीयप्रकारता तामादाय गोत्ववान्
अश्वत्वादित्यादावतिव्याप्तिवारणाय तन्निवेशनमावश्यकमिति वाच्य-
म् । विशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नजन्यतायां साध्यसंशयजनक-
तावच्छेदकेतरधर्मानवच्छिन्नत्वरूपतादृशनकतावच्छेदकपर्याप्तावच्छे-
दकताकत्वविरहादेवोक्तातिव्याप्त्यसम्भवादनुभवत्वादेरपि विशिष्टवै-
शिष्ट्यावगाहित्वावच्छिन्नजन्यतावच्छेदकघटकत्वात्, अन्यथोक्तविशे-
षणदानेऽपि गोत्वकालीनाश्वत्ववद्भूतलं गोत्ववन्न वेत्याकारकसंशयस्य
धर्मितावच्छेदकप्रकारकज्ञानमुद्रया साध्यविषयकत्वघटितधर्मावच्छि-
न्नजनकतावच्छेदकावच्छिन्नगोत्वकालीनाश्वत्वविशिष्टवैशिष्ट्यावगा-
हिबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतगोत्वाभाव-
वद्वृत्तिगोत्वकालीनाश्वत्ववानित्यादिज्ञानीयप्रकारतामादायातिव्या-
तितादवस्थ्यापत्तेः ॥ न चोक्तज्ञानमादायातिव्याप्तिभियैव तद्विशे-
षणं विहाय साध्यमुख्यविशेष्यकत्वावच्छिन्नत्वस्य निवेशान्नासङ्गति-
रिति वाच्यम् साध्यमुख्यविशेष्यकत्वावच्छिन्नत्वनिवेशकल्पेऽपि
अश्वत्ववद्गोत्वं गोत्ववन्न वेत्याकारकसंशयीयधर्मितावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ानत्वावच्छिन्नजनकतायां साध्यमुख्यविशेष्यकत्वावच्छिन्नत्वस्यापि
त्वात् तादृशजनकतावच्छेदकावच्छिन्नविशिष्टवैशिष्ट्यावगाहित्वा
च्छिन्नजन्यतामादायोक्तातिव्याप्तेर्दुर्वारत्वादिति । एतेन स्मृति-
दिसाधारणविशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नजन्यतामादायो-
तिव्याप्तिवारणाय साध्यविषयकत्वघटितधर्मावच्छिन्नत्वनिवेशन-
पि परास्तम्। तन्मते तद्विशेषणदानेऽप्युक्तरीत्याऽतिव्याप्तेरश-
हारतया जन्यतायां विशेषणान्तरं (१)प्रक्षिप्यैवोक्तातिव्याप्ते-
वादिति ।

यथा तु महानसीयवह्निमान् वह्निसामान्याभाववान् वेत्याकारकसंश-
ाभूतकोट्युपस्थितिजनकमहानसीयवह्निमदवृत्तिवह्निसामान्या-
द्वृत्तिपर्वतीयधूमवानितिज्ञानीयप्रकारतामादाय वह्निमान् पर्व-
धूमादित्यादावतिव्याप्तिवारणाय साध्यविषयकत्वघटितधर्मावच्छि-
ति साध्यतावच्छेदकपर्याप्तावच्छेदकताकविषयकत्वघटितध-
च्छिन्नार्थकमिति ॥ तच्चिन्त्यम् ॥ प्रकृतसाध्यसंशयत्वावच्छिन्न-
ध्यतानिरूपितजनकतानिवेशावश्यकत्वस्य प्रागेवाभिहितत्वेन उक्त-
संशयजनकतायां लक्षणाघटकत्वादेवोक्तातिव्याप्त्यसम्भवादिति
भावनीयम् ।

परे तु जनकतायां साध्यविषयकत्वघटितधर्मावच्छिन्नत्वानि-
वेशे वह्न्यभावाभाववद्वृत्तिवह्निमद्वृत्तिधूमवानितिज्ञानीयप्रकारतामादाय
ह्रदो वह्न्यभाववान् धूमादित्यादिविरुद्धेऽतिव्याप्तिरुक्तज्ञानीयप्रका-
रतायां साध्याभावविषयकत्वघटितधर्मावच्छिन्ना या वह्निविषयको-
पस्थितित्वावच्छिन्नवह्निमान् वह्न्यभाववानित्याकारकसाध्यसंशय-
जनकता तदवच्छेकत्वस्य सत्त्वात् ॥ न चोक्तज्ञानीयप्रकारतायां
साध्यतावच्छेदकावच्छिन्नकोटिताकसंशयत्वावच्छिन्नजन्यतानिरूपि-
तजनकतावच्छेदकत्वाभावादेव नातिव्याप्तिः। वह्निकोटिकसंशयत्व-
वह्न्यभावकोटिकसंशयत्वयोरेवोक्तज्ञानजन्योपस्थितिजन्यतावच्छे-
दकत्वादिति वाच्यम्। साध्यसंशयत्वावच्छिन्नजन्यतापदेन साध्यसं-
शयत्वन्यूनवृत्तिजन्यताया एव प्रागुक्तयुक्त्या विवक्षितत्वादित्याहुः॥

---

(१) अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नतादृशज्ञानावच्छिन्नत्वं जन्यतायां निवेशनीयमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ये तु यादृशविषयविशेषे साध्यसंशयसमनियत प
घटसंशयो जायते तत्र तत्साध्यकविरुद्धेतिव्याप्तिः। तथाच साध्य
भावसहचरितत्वावच्छिन्नां साध्याभावविषयकत्वघटितधर्मावच्छि
जनकतानिरूपितजन्यतानिरूपितजनकतावच्छेदकीभूत (घट)स
रितत्वावच्छिन्नां प्रकारतामादाय लक्षणगमनादिति साध्यविषय
घटितधर्मावच्छिन्नत्वनिवेशः। तथाच घटसहचरितवत्ताज्ञान
पस्थितित्वावच्छिन्नजनकतायां तादृशविषयकत्वानवच्छिन्नत्व
वदन्ति ॥ ८ ॥

अथवा साध्यसन्देहप्रयोजिका या साध्यस्य तदभावस्य चे
तिविषयता तदुभयप्रयोजकप्रकारतावत्त्वस्य विवक्षितत्वात्।
साहचर्यावच्छिन्नप्रकारताया एव तथात्वाभ्युपगमप्रसङ्गः। साध्य
पस्थितिविषयता च साध्याभावविषयतानन्तर्भूता ग्राह्या तेन
भावसाहचर्यावच्छिन्नप्रकारताया वह्निविषयताप्रयोजकत्वेऽपि
रुद्धे नातिव्याप्तिरिति भट्टाचार्येणोक्तम्—इतिपाठः क्वचित्कः।

अथैतत्कल्पेऽपि यत्र नित्यत्वतदभावविषयकज्ञानवानयं नित्
त्वतदभावसहचरितप्रमेयत्ववांश्चायमित्याकारकज्ञानाभ्यां नित्य-
त्वतदभावविषयिण्यैकैवोपस्थितिर्जनिता तत्र तादृशोपस्थितिजनक-
पक्षधर्मताज्ञानविषयत्वमादाय नित्यत्वसाध्यकज्ञानहेतौ प्रागु-
क्तातिव्याप्तिर्दुर्वारैव तादृशोपस्थितिव्यक्तेः साधारणधर्मवत्ताज्ञान-
जन्यत्वेन तदीयसाध्यतदभावविषयतायाः साध्यसंदेहप्रयोजकत्वस-
त्त्वेन तादृशोभयविषयताप्रयोजकत्वस्य नित्यत्वतदभावविषयकज्ञा-
नत्वावच्छिन्नप्रकारतायामपि सत्त्वात् इति चेन्न। साध्यस्योपस्थितिवि-
षयतानिष्ठसाध्यसन्देहत्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतानिय-
तप्रयोज्यताकप्रयोजकतावत्त्वे सति साध्याभावस्योपस्थितिविषय-
तानिष्ठसाध्यसन्देहत्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतानियतप्र-
योज्यतानिरूपितप्रयोजकतावत्प्रकारताया विवक्षितत्वादेवोक्तातिव्या-
प्तिवारणसम्भवान्नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानप्रयोज्यतायाः
साध्यसन्देहाजनकोपस्थितिविषयतासाधारणत्वेन साध्यसंशय-
प्रयोजकताव्यभिचारित्वादिति ध्येयम् ॥ ९ ॥

साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदको यो धर्म-
स्तदवच्छिन्नजन्यतानिरूपितायां तदवच्छिन्नसहकारितावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्याभावविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्न-
न्यतानिरूपितायां च जनकतायामवच्छेदकीभूतप्रकारतांया
शेन नातिप्रसङ्ग इति भट्टाचार्येणोक्तम् ॥

अत्र महानसीयवह्निमद्व्यावृत्तवह्न्यभाववद्व्यावृत्तपर्वतीयधूम-
तिज्ञानीयप्रकारतामादाय वह्निमान् पर्वतीयधूमादित्यादावतिव्या-
क्तज्ञानजन्यकोट्युपस्थितेरपि महानसीयवह्निमान् वह्निसामा-
न्यवान् वेत्याकारकसंशयजनकत्वादतः साध्यविषयकत्वेऽति
व्याप्तावच्छेदकपर्याप्तावच्छेदकताकनिरूपकताकत्वार्थकम् । तथा-
महानसीयवह्निमद्व्यावृत्तधूमवत्ताज्ञानजन्यमहानसीयवह्न्युपस्थिति-
जनकतावच्छिन्नजनकतायां साध्यतावच्छेदकताकविषयताकत्वावच्छिन्न-
त्वाभावोक्तातिव्याप्तिः। एवं महानसीयवह्निमद्व्यावृत्तवह्न्यभाववद्व्या-
वृत्तपर्वतीयधूमवानिति ज्ञानीयप्रकारतामादाय महानसीयवह्निमान्
धूमवानित्यादिविरुद्धेऽतिव्याप्तिवारणाय द्वितीयजनकतायां
साध्याभावविषयकत्वावच्छिन्नेति। अत्र साध्यविषयकत्वं साध्यमुख्य-
विशेष्यकत्वरूपं ग्राह्यम्। तेन वह्निकालीनमहानसीयवह्निमान् वह्निसा-
मान्याभाववान् वेत्याकारकसंशयजनककोट्युपस्थितिजनकतावच्छेदकीभूतवह्निकालीनमहानसीयवह्निमद्व्यावृत्तवह्न्यभाववद्व्यावृत्त-
पर्वतीयधूमवानितिज्ञानीयप्रकारतामादाय वह्निमान् पर्वतीयधूमादित्यादौ नातिव्याप्तिः ।

केचित्तु कालिकसम्बन्धेन संयोगसम्बन्धावच्छिन्नवह्न्यभावकोटिकसंशयजनककोट्युपस्थितिजनककालिकेन वह्न्यभाववद्वृत्तिकालिकसम्बन्धावच्छिन्नवह्न्यभावाभाववद्वृत्तिधूमवानिति ज्ञानमादाय वह्निमान् धूमादित्यादावतिव्याप्तिवारणाय साध्यविषयकत्वेऽति साध्यमुख्यविशेष्यकार्थकम् । एवं कालिकेन वह्निकोटिकसंशयजनकीभूतकोट्युपस्थितिजनकं कालिकेन वह्निमद्वृत्ति-विशेषणतया कालिकसम्बन्धावच्छिन्नवह्न्यभाववद्वृत्ति धूमवानितिज्ञानमादाय तत्रैवातिव्याप्तिवारणाय द्वितीयजनकतायां साध्याभावविषयकत्वावच्छिन्नेति । न च साध्यातावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावविषयकत्वावच्छिन्नत्वमात्रनिवेशेनाप्युक्तातिव्याप्तिवारणसम्भवात् प्रकृतसाध्याभावनिवेशो व्यर्थ इति वाच्यम् महानसीयवह्नितादृशवह्न्यभावसहचरितधूमवान् इत्यादिज्ञानीयप्रकारतामादाय वह्निमान् धूमादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादावतिव्याप्तिवारकत्वात् । न च साध्यविषयकत्वे साध्यतावच्छे
दकातिरिक्तनिष्ठप्रकारत्वानिरूपितत्वं निवेश्यं तावतैव नोक्तातिव्या
प्तिरिति वाच्यम् एवमपि समानाधिकरणत्वसम्बन्धेन महानसीय
विशिष्टवह्नित्वावच्छिन्नकोटिकसंशयजनककोट्युपस्थितिजनकश
मादायोक्तातिव्याप्तितादवस्थ्यात् । न चैवमपि साध्यविषयतायां स
तावच्छेदकनिष्ठनिरवच्छिन्नप्रकारतानिरूपितत्वस्य निरवच्छि
ध्यतावच्छेदकतास्थले सावच्छिन्नसाध्यतावच्छेदकतास्थले
तावच्छेदकतावच्छेदकपर्याप्तावच्छेदकप्रकारतानिरूपितत्वस्य
शाप्तातिव्याप्तिरिति वाच्यम् । तावतापयेकोक्त्यसम्भवात् साध
वाविषयकत्वेत्यत्र साध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रति
ताकाभावविषयकत्वनिवेशेनैवातिव्याप्तिविरहेण तदपेक्षयोक्त
गौरवाच्चेत्याहुः । तच्चिन्त्यम् ।

अत्र कल्पे संशयत्वं न निवेश्यते प्रयोजनाभावात
यश्च क्वचित् पुस्तके संशयजनकतेति पाठो दृश्यते स च मूले
ध्यसंशयेत्यनुरोध्येत्यवधेयम् ॥ अत्र च साध्यविषयकत्वघटितधर्म
वच्छिन्नजनकतावच्छेदकीभूतधर्मावच्छिन्नजन्यत्वमेवं साध्याभाव
विषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकीभूततद्धर्मावच्छिन्नस-
हकारितावच्छेदकावच्छिन्नजन्यत्वमेव निवेश्यम्, अन्यथा सामान्यतः
साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्य-
तानिरूपितजनकतावच्छेदका सती साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नसहकारितावच्छेदकसाध्याभावविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूता या प्रकारतेत्युक्तौ वह्निमद्वृत्तिवह्न्यभाववद्वृत्तिधूमवानिति ज्ञानमादायातिप्रसङ्गो दुर्वार एव-वह्न्यभाववद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थितित्वस्यापि साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकीभूतवह्निमद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थितित्वावच्छिन्नसहकारितावच्छेदकत्वात्, एतन्निवेशसूचनायैव साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदको यो धर्म इत्युक्तं तथा चोक्तज्ञानीयप्रकारतायां साध्याविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकीभूतवह्निमद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थितित्वरूपयादृशधर्मावच्छिन्ननिरूपितजनकतावच्छेदकत्वं वह्न्यभाववद्वृत्तिधर्मवताज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्योपस्थितित्वस्य तादृशधर्मावच्छिन्नसहकारितावच्छेदकत्वा-
भावान्नातिव्याप्तिरिति भावः ॥ अनुगमस्तु–साध्यविषयकत्वघटित-
र्मावच्छिन्नजनकतावच्छेदकधर्मविशिष्टप्रकारत्वम् । वैशिष्ट्यं
स्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व–स्वावच्छिन्न-
कारितावच्छेदकीभूतसाध्याभावविषयकत्वघटितधर्मावच्छिन्न-
तानिरूपितजनकतावच्छेदकत्वोभयसम्बन्धेनेति ॥ १० ॥

दवच्छिन्नसहकारितावच्छेदकत्वं च तदवच्छिन्नासमवधानप्र-
लोपधायकत्वाभाववत्स्वावच्छिन्नकत्वमित्युक्तं भट्टाचार्येण ॥
र्थ तदवच्छिन्ने स्वावच्छिन्नजनकतानिरूपितजन्यताशालित्व-
ावबद्वृत्तिस्वाघटकधर्मावच्छिन्नजनकतानिरूपितजन्यताशाल्यु-
तिमत्त्वोभयसम्बन्धेन धर्मविशिष्टान्यत्वं निवेशनीयम्, नातो व-
द्वृत्तिधूमवत्ताज्ञानजन्योपस्थितित्वावच्छिन्नाया वह्निमद्वृत्तिधूम-
वह्निमद्वृत्तिजलवानितिज्ञानद्वयजन्योपस्थितिव्यक्तेरसमवधान-
उक्तस्य फलोपधायकत्वाभावस्य केवलवन्ह्यभाववदवृत्तिधर्मादिम-
ताज्ञानजन्योपस्थितावेव सत्त्वेऽप्यसाधारणधर्मवत्ताज्ञानजन्योपस्थि-
तिसाधारणधर्मवत्ताज्ञानजन्योपस्थित्योः परस्परसहकारिभावः ।
स्वपदेन साधारणधर्मवद्धर्मिज्ञानत्वमादाय तदघटकीभूतधर्मिविषय-
तानरूपितसाधारण्याद्यवच्छिन्नप्रकारताकज्ञानत्वावच्छिन्नजन-
कतानिरूपितजन्यताशालित्वस्य केवलसाधारणधर्मवत्ताज्ञानजन्यो-
पस्थितावपि सत्त्वाद्धर्मविशिष्टान्योपस्थित्यप्रसिद्धिः स्यादतः स्वाभाव-
वद्वृत्तित्वनिवेशः । एवं वह्निविषयकस्मृतिं प्रति वह्निविषयकज्ञान-
त्वेनापि जनकत्वसत्त्वात् स्वाभाववद्वृत्तिवह्निविषयकज्ञानत्वमादाय
तथैवाप्रसिद्धिः स्यादतः स्वाघटकत्वनिवेशः । वह्निविषयकज्ञानत्वं च
न स्वाघटकम् । संसर्गघटकजन्यता च स्मृतित्वावच्छिन्ना ग्राह्या, तेन
जन्यताद्यवच्छिन्नं प्रति कालत्वादिना जनकतामादाय नाप्रसिद्धिः ।

अथवा संसर्गघटकजन्यतायां ज्ञानावच्छिन्नत्वमेव निवेश्यम्, तेन
प्रागुक्तयुक्त्या स्मृतित्वस्य साधारणादिधर्मवत्ताज्ञानजन्यतान-
वच्छेदकत्वेऽपि न क्षतिः, न वा स्मृतिं प्रति संस्कारत्वेन जनकता-
मादायाप्रसिद्धिः । एवं च स्वाघटकैत्वमप्यनुपादेयमेव । द्वितीयसंसर्ग-
घटकोपस्थितिमत्त्वं च सामानाधिकरण्य-समानकालीनत्वोभयसम्ब-
न्धेन । अथवा तदवच्छिन्ने धर्मविशिष्टान्यत्वमनिवेश्य तदवच्छिन्ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समवधानप्रयुक्तत्वपदेन तदवच्छिन्नप्रतियोगिताकाभावत्वावच्छि
प्रयोजकतानिरूपितप्रयोज्यत्वमेव निवेशनीयं तावतैवोक्तदोषवार
सम्भवात् । एवं स्वावच्छिन्नकत्वमित्यत्रापि स्वावच्छिन्ने निरुक्तो
सम्बन्धेन धर्मविशिष्टान्यत्वं निवेशनीयम्,तेन केवलसाध्यवद्वृत्ति
वत्ताज्ञानादिजन्योपस्थितित्वावच्छिन्नासमवधानप्रयुक्तस्य फ
धायकत्वाभावस्य साध्याभाववद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थि
लीनसाध्याभाववदवृत्तिधर्मवत्ताज्ञानजन्योपस्थितौ सत्त्वेऽपि
दोषतादवस्थ्यम् ॥

यत्तु तत्समानाधिकरणाभावप्रतियोगिधर्मावच्छिन्नासम
प्रयुक्तत्वविशिष्टतदवच्छिन्नासमवधानप्रयुक्तत्वस्य विवक्षितत
क्तदोषावसरः । वन्ह्यभाववद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थितिकात
न्ह्यभाववदवृत्तिधर्मवत्ताज्ञानजन्योपस्थितिनिष्ठस्य फलोपधाय
भावस्य वह्निमदवृत्तिधर्मवत्ताज्ञानादिजन्योपस्थितित्वावच्छि
माधानप्रयुक्तत्वेऽपि वह्निमद्वृत्तिधर्मवत्ताज्ञानजन्योपस्थितित्वसम
धिकरणाभावप्रतियोगिधर्मावच्छिन्नासमवधानाप्रयुक्तत्वाभावात्ता
शोपस्थितिनिष्ठफलोपधायकत्वाभावे निरुक्ताभावप्रतियोगि यद्वह्नि
मदवृत्तिधर्मवत्ताज्ञानजन्योपस्थितित्वं तदवच्छिन्नासमवधानाप्रयुक्त
त्वादिति ।

तन्मन्दम्–केवलवन्ह्यभावसहचरितधर्मवत्ताज्ञानजन्योपस्थितिनि
ष्ठफलोपधायकत्वाभावेऽपि निरुक्ताप्रयुक्तत्वविशिष्टवह्निसहचरितध
र्मवत्ताज्ञानजन्योपस्थितित्वावच्छिन्नासमवधानप्रयुक्तत्वाभावात् व
न्ह्यभावसहचरितधर्मवत्ताज्ञानजन्योपस्थितिनिष्ठफलोपधायकत्वा
भावे वन्ह्यभावाभावसहचरितधर्मवत्ताज्ञानजन्योपस्थितित्वावच्छिन्ना
समवधानस्यापि प्रयोजकत्वादिति ध्येयम् ॥ ११ ॥

इदं द्व्यणुकं नित्यमणुत्वादित्यादौ साधारणधर्मवद्धर्मिज्ञानस्य को
ट्युपस्थितिं संशयं च प्रति हेतुतया तद्विषये धर्मिणि सद्धेतौ प्रसङ्गः
स्यादतः पक्षधर्मतेति पक्षपदं धर्मिमात्रपरमिति शिरोमणिः ॥ अत्र
समूहालम्बनविषयतामादायातिप्रसङ्गवारणाय कोटिद्वयोपस्थितिजन
कतावच्छेदकीभूतविषयताश्रयत्वनिवेशनमावश्यकं सम्बन्धिविशेष्य
कज्ञानादपि सम्बन्ध्यन्तरस्मरणोदयेन तत्कोटिसाहचर्यादिविशिष्टविष
यकत्वेनैव हेतुतया धर्मिविषयताया जनकतानवच्छेदकत्वादित्याश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]क्य, वस्तुतस्तु साध्यसन्देहजनककोटिद्वयोपस्थितिजनकज्ञानाविष-
[illegible]कत्वमित्यस्य कोटिद्वयोपस्थितिनिष्ठा या साध्यसन्देहजनकता
[illegible]यतासम्बन्धेनाव्यवहितोत्तरत्वसम्बन्धेन वाऽवच्छिन्नायां तदव-
[illegible]दकतायामवच्छेदिका या विषयता तदाश्रयत्वमर्थः। एवं च
[illegible]धारणधर्मादिविशिष्यकज्ञानस्य कोटिद्वयस्मारकत्वेऽपि संशये
[illegible]ज्ञाननियमाय तत्तद्धर्मिकसंशयप्रत्यक्षं प्रति स्वाव्यवहितोत्तरत्व-
[illegible]न्धेन साधारण्यादिविशिष्टधर्मवत्तत्तद्धर्मिज्ञानविशिष्टकोट्युप-
[illegible]त्वेनैव हेतुतेति धर्मिविषयताया अपि तादृशसन्देहजनकता-
[illegible]कतायामवच्छेदकत्वादतिव्याप्तिरतः पक्षधर्मतापदोपादानमि-
[illegible]ट्टाचार्येणोक्तम्॥

[illegible]त्रापि प्रकृतसाध्यसंशयत्वावच्छिन्नजन्यतानिरूपिता या जनक-
[illegible]तानिरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतायामवच्छे-
[illegible]ता सती तदवच्छेदकधर्मावच्छिन्नसहकारितावच्छेदकावच्छिन्न-
[illegible]कृतसाध्यसंशयत्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपिताव्यव-
[illegible]हितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतायामवच्छेदिका या विषयता
तदाश्रयत्वमिति निष्कर्षो बोध्यः। तेन वन्हिमद्वृत्तिवन्ह्यभाववदवृत्ति-
धूमवानित्यादिज्ञानमादाय न प्रागुक्तदोषावकाशः। वन्ह्यभाववान् प-
र्वतीयधूमादित्यादिविरुद्धे वन्ह्यभाववदवृत्तिमहानसीयवन्हिमदवृ-
त्तिपर्वतीयधूमवानित्यादिज्ञानीयप्रकारतामादायातिव्याप्तिरुक्तज्ञानीय-
प्रकारतायां प्रकृतसाध्यसंशयत्वावच्छिन्नजन्यतानिरूपिता या व-
न्ह्यभाववदवृत्तिधूमवत्ताज्ञानजन्यकोट्युपस्थितित्वावच्छिन्नजनकता
तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिता-
वच्छेदकत्वस्य सत्त्वादतः संशयद्वयोपादानम्। यदि चात्रापि साध्यवि-
षयकोपस्थितित्वावच्छिन्ना या जनकता तन्निरूपिताव्यवहितोत्तरत्व-
सम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावती या विषयता
तदाश्रयत्वं विवक्ष्यते तदा साध्यसन्देहपदमनुपादेयमिति ध्येयम्।

अथात्र प्रागुक्तार्थमपहाय धर्मिण्यतिव्याप्तिदानार्थमेतादृशार्थकर-
णमनुचितमिति चेन्न, प्रागुक्तकल्पापेक्षया लाघवानुसन्धानेनैवैतत्क-
ल्पस्योक्तत्वात्।

वस्तुतस्तु साधारणधर्मादिविशेष्यकज्ञानस्यापि कोट्युपस्थिति-
जनकत्वे पूर्वव्याख्यायामसंभव एव स्यात् संशये धर्मिभाननियमाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशयजनकतावच्छेदककोटौ साधारणादिधर्मवद्धर्मिज्ञानवैशिष्ट्य-
स्यैव निवेशनीयतया संशयजनकतावच्छेदकेतरानवच्छिन्नत्वरूप-
साध्यसंशयजनकतावच्छेदकपर्याप्तावच्छेदकताकत्वस्य साधारण-
र्मादिज्ञानजन्यतायामसत्त्वात् साधारणधर्मादिविशेष्यकज्ञानस्य
तज्जन्यतावच्छेदकघटकत्वादतो व्याख्यान्तरानुसरणमिति ध्येयम्।

वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयत्वम् अनुमितिप्र-
न्धकताशून्यपक्षधर्मिकहेतुमत्तानिश्चयकालीनज्ञानावृत्ति तादृश-
व विवक्षणीयम् ॥ अथवा स्वव्यापकतत्कत्वरूपानतिरिक्त-
त्वनिवेशे यादृशविशिष्टविषयकनिश्चयत्वव्यापकः पक्षधर्मि-
कालीनत्वानुमित्यप्रतिबन्धकत्वोभयाभावः तादृशत्वमेव विव-
यम्, अन्यथा स्वरूपासिद्धिवारकस्य हेतुमत्ताग्रहाविरोधित्वद-
वैयर्थ्यापत्तेः—पक्षधर्मिकहेतुमत्तानिश्चयकालीनतद्विषयकानाहा-
निश्चयस्याप्रसिद्ध्या यादृशविशिष्टविषयकपदेन तस्योपादानास-
वात्। एवं सामान्यलक्षणस्याप्यव्याप्तेरिति भट्टाचार्येणोक्तम्।

अथात्र प्रथमकल्पे यादृशविशिष्टविषयकनिश्चयत्वमनुमिति-
प्रतिबन्धकताशून्यपक्षधर्मिकहेतुमत्ताज्ञानावृत्तित्युक्तौ, द्वितीये च
विशिष्टविषयकनिश्चयत्वव्यापकः पक्षधर्मिकहेतुमत्ताविषयकत्वानु-
मित्यप्रतिबन्धकत्वोभयाभाव इत्युक्तावेव सामञ्जस्ये हेतुमत्त्वज्ञानका-
लीनत्वपर्यन्तनिवेशो व्यर्थ इति।

मैवम्। यादृशस्थले यादृशस्य वस्तुनो हेतुमत्पक्षविषयकज्ञा-
नं कदापि न जातं तत्र तादृशवस्तुन्यतिव्याप्तिवारणायैव तन्निवेशात्।
जातिमान् वह्न्यभाववानित्यादिज्ञानवारणायाव्यापकीभूतविषयता-
शून्यत्वस्यावश्यं निवेश्यतया उदासीनेतिऽव्याप्तिवारणाय तन्निवेशा-
वश्यकत्वाच्च। अन्यथा हेतुमत्त्वाविषयकोदासीनानिश्चयस्यैवाव्याप-
कीभूतविषयताशून्यत्वादुदासीनातिव्याप्त्यापत्तेः। वस्तुतो ह्रदो वह्नि-
मान् जलाभावव्याप्यादित्यादौ जलवद्ध्रदादावतिव्याप्तिवारणार्थमेव
तन्निवेशनम्। जलवद्ध्रदविषयकहेतुमत्ताज्ञानस्याहार्यत्वेन धर्तुम-
शक्यत्वादिति ध्येयम्। यद्यपि हेतुमताज्ञानाविगमकालावच्छेदेनोदा-
सीननिश्चयसामान्ये निरुक्तोभयाभावसत्त्वादतिव्याप्तितादवस्थ्यमे-
व, तथापि हेतुमत्ताज्ञानक्षणावच्छेदेन निरुक्तोभयाभावविवक्षणान्न
दोषः। हेतुमत्त्वज्ञानकालीनत्वस्य भावप्रतियोगिकोटावुपलक्षणतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवेशान्नोक्तदोषः। यदा कदाचित् तादृशज्ञानकालीनत्वसत्त्वे उपल-
नताभावासत्त्वात् इत्यपि वदन्ति।

वस्तुतः प्रतियोगिवैयधिकरण्याघटितव्यापकतानिवेशे न दोष
ध्येयम्।

अथात्र कल्पद्वय एव ह्रदत्वादिसामानाधिकरण्येन वन्ह्यादिसाध्य-
दिहेतुकस्थले वह्निव्यापकीभूताभावप्रतियोगिजलात्मकासा-
ऽव्याप्तिः—सामानाधिकरण्येन हेतुमत्ताज्ञानकालीनतादृशा-
ध्यनिश्चये तादृशानुमितिप्रतिबन्धकत्वस्यासत्त्वात्। न च सा-
करण्येन साध्यहेतुस्थलेऽवच्छेदावच्छेदेन हेतुमत्ताज्ञानका-
वनिवेशान्नोक्ताव्याप्तिरिति वाच्यम्। तथासति सामानाधिकर-
त्वभाववत्पक्षेऽतिव्याप्त्यापत्तेः अवच्छेदावच्छेदेन हेतुमत्तानि-
कालीनतादृशहेत्वभाववत्पक्षविषयकनिश्चयस्याहार्यतया ताद-
तुमत्ताज्ञानाकालीनसामानाधिकरण्येन हेत्वभाववत्पक्षविषयक-
श्चयस्यैव यादृशविशिष्टविषयकनिश्चयपदेन धर्त्तव्यतया तत्राव-
च्छेदावच्छेदेन हेतुमत्तानिश्चयकालीनत्वस्यासत्त्वादिति चेत्;

अत्रोच्यते—अवच्छेदावच्छेदेन हेतुमत्ताग्रहकालीनत्वघटितो-
भयाभाव एवासाधारण्यसङ्ग्रहाय निवेशनीयः। सामानाधि-
करण्येन साध्यहेतुतास्थले सामानाधिकरण्येन हेत्वभाववत्पक्षे
चातिव्याप्तिशङ्कैव नोपजायते। यत्रादौ भाविज्ञानमप्रमेत्यप्रामाण्य-
ज्ञानं ततः सामानाधिकरण्येन हेत्वभाववत्पक्षविषयकनि-
श्चयस्ततोऽवच्छेदावच्छेदेन हेतुमत्तानिश्चयस्तत्राप्रामाण्यज्ञाना-
भावावच्छेदकक्षणावच्छेदेन तादृशहेत्वभाववत्पक्षविषयकनिरुक्तो-
भयाभावासत्त्वात्। एवं चाप्रामाण्यज्ञानाभावावच्छेदकक्षणावच्छेदे-
न तादृशोभयाभावो निवेशनीयः, तेनाप्रामाण्यज्ञानाभावविशिष्टयद्रू-
पावच्छिन्नावषयकानश्चियत्वावच्छदेकीभूतक्षणावच्छिन्नयद्रूपावच्छि-
न्नविषयकनिश्चयवृत्तिकाभावाप्रतियोगी निरुक्तोभयाभावस्तद्रूपव-
त्त्वमिति समुदितार्थः। नातो यत्रादावसाधारण्यनिश्चयस्ततस्तद्-
धर्मिकाप्रामाण्यज्ञानात्मकहेतुमत्त्वानिश्चयस्तत्रासाधारण्यनिश्चयेऽपि
तादृशोभयाभावासत्त्वेप्यसाधारण्याव्याप्तिः। न च तथापि यत्र
ज्ञानस्य पक्षत्वं घटादेः साधारण्येन साध्यत्वं प्रकारकत्वाभावस्य
हेतुत्वं तत्र तदभाववद्विशेष्यकतत्प्रकारकत्वरूपाप्रामाण्यग्रहे हेतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्ताज्ञानस्याहार्य्यतया हेत्वभाववत्पक्षेऽतिव्याप्तिर्दुर्वारैवेति वा
च्यम्। तत्रापि संशयात्मकाप्रामाण्यज्ञानस्य संभवात्, तद्व्यक्तित्व
दिधर्मितावच्छेदककाप्रामाण्यनिश्चयस्य तद्वति तत्प्रकारकत्वाभा
रूपाप्रामाण्यनिश्चयस्य संभवाच्च। न च तथाप्यप्रामाण्यकोटौ त
भाववन्निष्ठविशेष्यत्वतद्वन्निष्ठविशेष्यत्वयोः प्रवेशाद् यत्र निष्ठ
भावस्य सामानाधिकरण्येन हेतुत्वं विशेष्यतायाश्च पक्षत्वं वि
णांशे संशयानभ्युपगमेन तत्र संशयात्मकाप्रामाण्यस्यासंभवात्
मानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम्
पि भाविज्ञानं निर्विशेष्यकं निष्प्रकारकमित्याकारकाप्रामाण्य
संभवात्। ह्रदः काञ्चनमयह्रदवान् गगनादित्यादौ काञ्चनमयत
पकीभूताभावप्रतियोगिगगनाद्यात्मकविशिष्टे ह्रदो वन्हिमद्ध्र
जलादित्यादौ वन्ह्यभाववज्जलवदात्मकविशिष्टे चातिव्याप्तिः
धर्मिकहेतुमत्तानिश्चयकालीनस्य तत्तद्विशिष्टविषयकनिश्चयस्य
धर्मिककाञ्चनमयत्ववन्हिमत्त्वादिज्ञानप्रतिबन्धकत्वेन हेतुमत्तानि
याकालीनतत्तन्निश्चयस्य च हेतुमत्ताज्ञानकालीनत्वाभावेन तत्ताद्वि
शिष्टविषयकनिश्चयसामान्य एव तादृशोभयाभावसत्त्वादिति।

मैवम्—ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वावच्छि-
न्नत्वोभयाभावस्य निरुक्तोभयाभावप्रतियोगिकुक्षिनिक्षिप्तप्रतिबन्ध-
कतायां निवेशेनैवोक्तदोषवारणसम्भवात्। न चैवं घटो गगनाभा-
ववदभाववत्कालीनगगनवान् घटादित्यादौ तादृशगगनाभाववद्-
घटाद्यात्मकबाधेऽव्याप्तिः—तादृशबाधनिश्चये सामान्यनिरुक्तिपत्रिको-
क्तयुक्त्या ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताया एव कल्पनीयतया नि-
रुक्तोभयाभाववत्प्रतिबन्धकताशून्यत्वघटिततादृशोभयाभावासत्त्वा-
दिति वाच्यम्। उक्तस्थले शुद्धगगनत्वावच्छिन्नप्रतियोगिताकाभाववत्-
पक्षस्यैव बाधत्वोपगमेनोक्तविशिष्टस्यालक्ष्यत्वात्। लक्ष्यत्वे तु यादृश-
विशिष्टविषयकनिश्चयत्वव्यापको निरुक्तोभयाभाव इत्यत्र व्यापकत्वं
न यादृशविशिष्टविषयकनिश्चयत्ववन्निष्ठाभावप्रतियोगित्वाभावमात्रं,
किन्तु यादृशविशिष्टे यादृशविशिष्टविषयकनिश्चयत्ववन्निष्ठाभावप्रति-
योगित्वविशिष्टयादृशविशिष्टे यादृशविशिष्टव्याप्यवत्तानिश्चयनिष्ठा-
भावप्रतियोगित्वाभावरूपमेव विवक्षणीयम्। तथाच यद्रूपावच्छिन्ने
यद्रूपावच्छिन्नप्रकारकनिश्चयानिष्ठाभावप्रतियोगित्वाविशिष्टतद्रूपाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छिन्नविशेष्यकतद्रूपावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारकनिश्चयनि-
ाभावप्रतियोगित्वाभाववान् तादृशोभयाभावस्तद्रूपावच्छिन्ने तद्रूपा-
च्छिन्नवत्त्वमिति लक्षणार्थः पर्यवसितः। एवञ्चोक्तबाधविषयकनिश्च-
वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकत्वास्वीकारेऽपि तादृशबाध-
ध्यवत्तानिश्चयत्वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकत्वस्यावश्य-
कार्यतयोक्तबाधाव्याप्तिः सुपरिहारैवेति। न चैवं पर्वतो वह्नि-
ाभाववानित्यादौ वन्हिमत्पर्वतविषयकनिश्चये तादृशोभयाभा-
ोऽपि वन्हिव्याप्यवत्पर्वतविषयकनिश्चये तादृशोभयाभावस्या-
प्र्यादिति वाच्यम्। व्याप्यवत्तानिश्चये यत्प्रतिबन्धकताप्रयुक्तो-
ावस्तत्प्रतिबन्धकतामादायैव लक्षणं संगमनीयम् तत्प्रतिबन्ध-
नरूपितप्रतिबध्यतावच्छेदकतापर्याप्त्याधिकरणधर्मावच्छिन्नप्र-
न्धकतानिरूपितप्रतिबध्यताशून्यत्वस्य तद्रूपावच्छिन्नव्याप्य-
नश्चयविशेषणत्वेनैवोक्तातिव्याप्तिवारणसंभवात्। न च तथापि
नाभाववत्घटवत्कालीनभूतलं गगनवदित्यत्र घटवत्गग-
नाभाववत्घटवत्कालीनभूतले अतिव्याप्तिर्लाघवात् गगनाभाववद्-
घटवत्कालीनभूतलविशेष्यकघटवत्त्वनिश्चयत्वेन प्रतिबन्धकतयैवो-
पपत्त्या घटावच्छेदेन गगनाभावनिश्चयविशिष्टगगनाभाववद्घटवत्-
कालीनभूतलविशेष्यकघटवत्त्वनिश्चयत्वेन प्रतिबन्धकत्वाकल्पनादि-
ति वाच्यम्, उभयाभावप्रतिकोटिनिविष्टप्रतिबन्धकतायामगत्या तत्त-
त्प्रतिबन्धकताभेदादिकं निवेश्यैवोक्ताऽतिव्याप्तेर्वारणीयत्वात्।

वस्तुतस्तु घटवद्गगनाभाववत् घटवच्च तादृशभूतलं पटव-
द्गगनाभाववत् पटवच्च तादृशभूतलमित्यादिनानाविधनिश्चयसा-
धारणैकरूपेण पक्षतामाथुरीपत्रिकोक्तदिशा ज्ञानवैशिष्ट्यावच्छिन्नप्र-
तिबन्धकताया एव सद्युक्तिकतया उक्तातिप्रसक्तिरेव नास्तीति। एते-
न यत्र वन्हिव्यापकीभूताभावप्रतियोगिजलस्य पक्षत्वं वन्हेः साध्यत्वं
जलस्य हेतुत्वं तत्र वन्हिव्यापकीभूताभावप्रतियोगिजलात्मकसा-
धारण्येऽव्याप्तिः-वन्हिव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नध-
र्मिकवन्हिमत्त्वबुद्धिं प्रति लाघवात् तादृशजलत्वावच्छिन्नधर्मिकज-
लप्रकारकनिश्चयत्वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया एव
स्वीकार्यतया पक्षधर्मिकहेतुमत्ताज्ञानकालीनकेवलतादृशसाधारण्य-
निश्चये प्रतिबन्धकत्वाभावेन निरुक्तोभयाभावस्यासत्त्वादित्यपि प्रत्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तम् । दर्शितयुक्त्या नानाविधनिश्चयसाधारणनिश्चयस्यापि ज्ञान
वैशिष्ट्यावच्छिन्नप्रतिबन्धकताया एव कल्पनीयत्वादिति । न चै
मपि ह्रदो वह्निमान् गगनवत्ह्रदकालीनगगनव्याप्यवज्जलवद्वृत्तिज
दित्यादौ जलावच्छेदेन गगनाभावादेर्दोषत्वापत्तिः;तद्विषयनिश्चय
पक्षधर्मिकहेतुमत्तानिश्चयकालीनस्याहार्य्यतया पक्षधर्मिकहेतु
निश्चयकालीनस्य तद्विषयनिश्चयस्यैव धर्तव्यतया तत्र तादृशो
भावस्याक्षतत्वादिति वाच्यम् । भाविज्ञानधर्मिकाप्रामाण्यज्ञान
कथंचिदनाहार्य्यस्यापि पक्षधर्मिकहेतुमत्ताज्ञानकालीनस्य
कनिश्चयस्य संभवादिति ध्येयम् ॥

अथवा सामानाधिकरण्येन साध्यहेतुतास्थले सामाना
ण्येन हेतुमत्ताज्ञानकालीनत्वमेव निवेशनीयमतो न तादृशहेतुव
सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिः । सामानाधिकर
साध्यहेतुतास्थले असाधारण्यसंग्रहस्तु असाधारण्याविषयक
निष्ठपक्षधर्मताज्ञानकालीनत्वानुमित्यप्रतिबन्धकत्वोभयाभावविव
व करणीयः । न चैवमसाधारण्याविषयकत्वानुमित्यप्रतिबन्धकत्वो
भयाभावमात्रस्यैव सम्यक्त्वे पक्षधर्मताज्ञानकालीनत्वनिवेशो व्यर्थ
इति वाच्यम् । धर्मिभेदेन वैयर्थ्याभावात् । न च तथापि वह्निव्याप
कीभूताभावप्रतियोगि जलं वह्निमज्जलादित्यादौ सामानाधिकरण्येन
साध्यहेतुतास्थले सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्ति
र्दुर्वारैवोक्तस्थले तादृशहेत्वभाववत्पक्षविषयकज्ञानमात्रस्यैवासाधा
रण्यविषयकत्वेनासाधारण्याविषयकज्ञाननिष्ठपक्षधर्मिकहेतुमत्ताज्ञा
नकालीनत्वघटितनिरुक्तोभयाभावस्य तत्राक्षतत्वादिति वाच्यम् ।
असाधारण्याविषयकपदेनासाधारण्याविषयतानन्तर्गतविषयताशालि
ज्ञानस्य विवक्षितत्वात् ॥

यद्वा असाधारण्याविषयकपदेनासाधारण्यविषयत्वाव्यापकीभूत
विषयताशालिज्ञानमेव विवक्षणीयम्, तेन सामानाधिकरण्येन वन्ह्या
दिसाध्यकजलादिहेतुकस्थले असाधारण्यविषयतानन्तर्गतविषयता
शालिनि वह्निव्यापकीभूताभावप्रतियोगि जलं वह्निमदित्याकारकजलांशे
वह्नेर्भ्रमात्मकासाधारण्यज्ञाने तादृशोभयाभावासत्त्वेऽपि नासाधा
रण्याव्याप्तिः—उक्तभ्रमज्ञानस्यासाधारण्यविषयत्वाव्यापकीभूताविषय
ताशालित्वाभावात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा जातिमान् वन्ह्यभाववानित्यादिज्ञानवारणायैवाव्यापकीभू-
विषयिताशून्यत्वमपहाय स्वावच्छिन्नविषयतानन्तर्गतविषयिताशू-
वमेव निवेशनीयम् । तावतैवोक्तभ्रममादायासाधारण्याव्याप्तिवार-
म्भवात् । अत एवैतत्कल्पे वह्निव्यापकीभूताभावप्रतियोगिजलं
जलादित्यत्र

1924.

THE

KHAMBÂ SANSKRIT SERIES;

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 324.

क्रोडपत्रसङ्ग्रहः ।

अत्र

श्रीकालीशङ्करसिद्धान्तवागीशविरचिताः

मानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुम

परेयुत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्ति

कायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ।

KRODAPATTRASANGRAH

or Critical Notes

On Anumânajâgadîsî, Pratyakshânumânagâdâdhar, Vyutpattivâda, Shaktivâda, Mukti-vâda, Shabdasaktiprakâshikâ, Kusumâñjali.

कत्वां-
बन्धरूपावच्छेद-
मान् धूमादित्यादिसामा-
नाधिकरण्येन धूमाभाववद्ध्र-
देऽतिव्याप्तिः ह्रदत्वसामानाधिकरण्येन धूमाभावविषयताया अपि
धूमाभावावच्छेदेन घटाभावनिश्चयविशिष्टधूमाभाववद्ध्रदविषयक-
निश्चयत्वावच्छिन्नप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तम् । दर्शितयुक्त्या नानाविधनिश्चयसाधारणनिश्चयस्यापि ग्राह्य-
वैशिष्ट्यावच्छिन्नप्रतिबन्धकताया एव कल्पनीयत्वादिति । न चै
मपि ह्रदो वह्निमान् गगनवत्ह्रदकालीनगगनव्याप्यवज्जलवद्वृत्तिज
तद्विषयनिश्चय

हेतुय
शो

कर्
वविव
बन्धकत्वे
शो व्यर्थ
वह्निव्याप-
ज्ञा करणयेन
कीभू व्याप्ति-
साध साधा-
दुर्वारै ज्ञा-
रण्यवि ण्यम् ।
नकाल लि-
असाध
ज्ञानस्य ।

यद्वा असाधार
विषयताशालिज्ञानमेव विव
दिसाध्यकजलादिहेतुकस्थले असाधार तान्तर्गता
शालिनि वह्निव्यापकीभूताभावप्रतियोगि जलं वह्निमदित्याकारकजलांशे
वह्नेर्भ्रमात्मकासाधारण्यज्ञाने ताद्दशोभयाभावासत्त्वेऽपि नासाधा-
रण्याव्याप्तिः–उक्तभ्रमज्ञानस्यासाधारण्याविषयत्वाव्यापकीभूताविषय-
ताशालित्वाभावात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा जातिमान् वन्ह्यभाववानित्यादिज्ञानवारणायैवाव्यापकीभूतविषयिताशून्यत्वमपहाय स्वावच्छिन्नविषयतानन्तर्गतविषयिताशून्यत्वमेव निवेशनीयम् । तावतैवोक्तभ्रममादायासाधारण्याव्याप्तिवारणसम्भवात् । अत एवैतत्कल्पे वह्निव्यापकीभूताभावप्रतियोगिजलं तज्जलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नकजलप्रकारकनिश्चयत्वेनासाधारण्यज्ञानस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकत्वस्वीकारेऽपि न प्रागुक्तासाधारण्याऽव्याप्तिः—साधारण्याविषयकज्ञाननिष्ठपक्षधर्मताज्ञानकालीनत्वघटितनिरुक्तभावस्यासाधारण्यज्ञानेऽक्षतत्वात् । उक्तस्थले जलवद्वह्निव्यापकीभूताभावप्रतियोगिजलात्मकेऽतिव्याप्तिस्तु कथञ्चित् तत्प्रतिबन्धकताभेदादिकं निवेश्यैव वारणीया ॥

वस्तुतो जलवत्त्वादशजलेऽसाधारण्यरूपविशिष्टान्तरघटितत्वेन विशिष्टान्तराघटितत्वविरहादेव नातिव्याप्तिः । गगनाभाववद्घटकालीनभूतलं गगनवदित्यत्र गगनाभाववद्घटवत्कालीनघटवत्भूतले प्रागुक्तातिव्याप्तिस्त्वगत्या तत्तत्प्रतिबन्धकताभेदादिकं निवेश्यैव वारणीया । एतत्कल्पे पक्षधर्मिकहेतुमत्ताज्ञानेऽनाहार्य्यत्वादिकं प्रयोजनविरहेण न निवेश्यते, तेन ह्रदः काञ्चनमयह्रदवान् गगनाद्भ्रदो वह्निमद्भ्रदवान् जलाद्भ्रदो वह्निमान् गगनवद्भ्रदकालीनगगनव्याप्यवज्जलवद्वृत्तिजलादित्यादौ न प्रागुक्तातिव्याप्तीनामवकाशः—आहार्य्यात्मकहेतुमत्ताज्ञानकालीनतत्तद्विशिष्टविषयकनिश्चये निरुक्तोभयाभावासत्त्वादिति ध्येयम् ॥

परे तु सर्वत्रैव पक्षतावच्छेदकावच्छेदेन हेतुमत्तानिश्चयकालीनत्वमेव निवेशनीयम् । सामानाधिकरण्येन साध्यहेतुतास्थले सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिवारणाय पुनर्यादृशविशिष्टविषयित्वमेव ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नोभयाभाववत्प्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकतावत्त्वेन निवेशनीयम् । घटवद्भ्रदो वह्निमान् धूमादित्यादिसामानाधिकरण्येन साध्यहेतुतास्थले सामानाधिकरण्येन धूमाभाववद्भ्रदेऽतिव्याप्तिः ह्रदत्वसामानाधिकरण्येन धूमाभावविषयताया अपि धूमाभावावच्छेदेन घटाभावनिश्चयविशिष्टधूमाभाववद्भ्रदाविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादतः प्रतिबन्धकतायामुभयाभावत्वनिवेशः। न चैवं यादृश-
विशिष्टविषयित्वसामान्यं निरुक्तोभयाभाववत्प्रतिबन्धकताया
स्वरूपसम्बन्धरूपावच्छेदकत्ववत्तादृशत्वमेव सम्यक् अनुमित्य
तिबन्धकत्वघटितोभयाभावदलवैयर्थ्यमिति वाच्यम्। वृक्षः सं
गी तत्त्वादित्यत्र संयोगाभाववद्वृक्षादावतिव्याप्तिवारणायैव त
र्थक्यात्। न च यादृशविशिष्टविषयकनिश्चयेऽव्याप्यवृत्तित्वज्ञा
स्कन्दितत्वनिवेशावश्यकतयोक्तविशेषणदानेऽप्युक्तातिव्याप्तित
स्थ्यमिति वाच्यम्, यादृशविशिष्टविषयकनिश्चयेऽव्याप्यवृत्ति
मानास्कन्दितत्वस्यैव निवेशनीयत्वात्। अतएव ह्रदः काञ्चनम
वान् गगनादित्यादौ प्रागुक्तातिव्याप्तीनामप्यनवकाशः—तत्ताद्वा
षयतायां निरुक्तोभयाभाववत्प्रतिबन्धकतायाः स्वरूपसम्बन्ध
वच्छेदकत्वाभावादिति। न चैवं वह्निव्यापकीभूताभावप्रतियो
लं वह्निमज्जलादित्यत्र सामानाधिकरण्येन हेत्वभाववत्पक्षे प्र
क्तातिव्याप्तिः तादृशपक्षविषयताया अप्यसाधारण्यविषयत्व
च्छिन्नप्रतिबन्धकतावच्छेदकत्वादिति वाच्यम्, तदन्तर्गतवह्निव्याप
कीभूताभावप्रतियोगित्वप्रकारतानिरूपितजलत्वावच्छिन्नविशेष्यता-
या एव तादृशप्रतिबन्धकतावच्छेदकत्वेन जलाभावत्वावच्छिन्नप्रका-
रतानिरूपितवह्निव्यापकीभूताभावप्रतियोगित्वजलत्वोभयधर्मावच्छि-
न्नावशेष्यतायास्ततो भिन्नत्वेन तादृशप्रतिबन्धकतानवच्छेदकतयै-
वोक्तातिव्याप्तेरनवकाशादित्याहुः। तच्चिन्त्यम्॥

यत्तु अवच्छेदावच्छेदेन हेतुमत्ताज्ञानकालीनत्वघटितोभयाभाव
एव निवेशनीयः। सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिवा-
रणाय पुनः स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धक-
ताधर्मावच्छिन्नविषयिताभिन्ना याऽवच्छेदावच्छेदेन हेतुमत्ताग्रहप्र-
तिबन्धकतावच्छेदकविषयिता तदन्ययद्रूपावच्छिन्नविषयित्वं विशे-
षणीयम्, अतो न कोपि दोष इति।

तत्तुच्छम्। जलं वह्निमज्जलादित्यादौ वह्निव्यापकीभूताभावप्र-
तियोगिजलात्मकासाधारण्यविषयितायाः स्वावच्छिन्नाविषयकत्वव्या-
पकप्रतिबन्धकताधर्मावच्छिन्नविषयिताभिन्नतया वह्निव्यापकीभूता-
भावप्रतियोगित्ववज्जलाभाववदित्याकारकज्ञानसाहतताद्दशप्रतियो-
गित्ववच्च जलमित्याकारकज्ञानयोरवच्छेदावच्छेदेन हेतुमत्ताग्रहप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धकतावच्छेदकतया च निरुक्तविषयिताभिन्नत्वाभावादसाधारण्याव्याप्त्यापत्तेः।

यदि चानतिरिक्तवृत्तित्वरूपमवच्छेदावच्छेदेन हेतुमत्ताग्रहप्रतिबन्धकतावच्छेदकत्वमेव निवेशनीयमतो नोक्तदोषः। न ह्रदत्वावच्छेदेन वह्निसाध्यकधूमहेतुकस्थले स्वावच्छिन्नविषयव्यापकप्रतिबन्धकताकधर्मावच्छिन्नविषयिताभिन्ननिरुक्तहेतुमद्ह्रदप्रतिबन्धकतानतिरिक्तवृत्तिविषयित्वाप्रसिद्धिरिति वाच्यम्। ह्रदनान्यावगाहि-अभावत्वेन घटावगाहि-धूमाभाववान् ह्रद इत्याकारभ्रमविषयत्वस्यैव तादृशत्वेन प्रसिद्धत्वादित्युच्यते। तदापि ह्रदस्य पक्षत्वं ह्रदत्वसामानाधिकरण्येन गगनाभाववद्ध्रदकाभावहेतुः साध्यत्वं गगनस्य हेतुत्वं तत्र गगनाभाववद्ध्रदकाभावहिव्यापकीभूताभावप्रतियोगिगगनरूपासाधारण्ये, एवं यत्राभावस्य पक्षत्वं सामानाधिकरण्येन वह्नेः साध्यत्वं वह्निमन्निष्ठभेदप्रतियोगितानिरूपितस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वस्याधेयत्वाभावस्य वा हेतुत्वं, एवं वह्निव्यापकीभूताभावप्रतियोगिवह्निमन्निष्ठभेदप्रतियोगितावच्छेदकत्वरूपासाधारण्ये वह्निव्यापकीभूताभावप्रतियोगिन्याधेयत्वाभावरूपासाधारण्ये चाव्याप्तिः—तत्तदसाधारण्यविषयितायामवच्छेदावच्छेदेन हेतुमत्ताग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वेन निरुक्तविषयिताभिन्नत्वाभावादिति॥

वस्तुतस्तु असाधारण्यविषयित्वाव्यापकीभूतविषयिताशून्यत्वानुमित्यप्रतिबन्धकत्वोभयाभावो यादृशविशिष्टविषयकनिश्चयत्वव्यापकस्तादृशत्वमिति विवक्षणे न कश्चिद्दोष इति नवीनपदवी सुधीभिर्ध्येया॥ १३॥

सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबन्धकं तादृशविशिष्टत्वमिति भट्टाचार्यैणोक्तम्।

अत्र सधर्मितावच्छेदककहेतुमत्तानिश्चयीयहेतुप्रकारकत्वं हेतुतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तावच्छेदकताकत्वेन विशेषणीयम्। अतो जातिमत्त्वान् ह्रद-इत्याकारकहेतुमत्तानिश्चयकाली-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नस्य वह्निव्यापकीभूताभावप्रतियोगिजलमित्याकारकसाधारण्यनि-
श्चयस्यानुमित्यप्रतिबन्धकत्वेऽपि न क्षतिः। धर्मितावच्छेदकत्वं चो
भयमेव निरवच्छिन्नं ग्राह्यम्। तेन जलवान् ह्रद-इत्याकारकहे
मत्तानिश्चयसमानधर्मितावच्छेदककजातिमान् वन्हिमानित्याद्यनु
त्यन्तर्भावेन प्रतिबध्यताया व्यापकत्वभङ्गेऽपि न क्षतिः। न
दोषविषयकनिश्चयकालीनजातिमत्वान् जलवानित्यादिहेतुमत्ता
श्चयीयविशेष्यतावच्छेदकनिष्ठानिरवच्छिन्नावच्छेदकताकाविशेष्य
कानुमित्यप्रसिद्धावप्यसम्भवः।

अथात्र शब्दत्ववान् घटः शब्दत्ववान् शब्दश्च इत्याकार
मत्तानिश्चयकालीननित्यत्वव्यापकीभूताभावप्रतियोगिशब्दत्वावि
कारकासाधारण्यनिश्चयस्यापि तादृशनिश्चयसामान्यान्तर्गततय
त्समानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसा
मान्यान्तर्गत-घटो नित्यः शब्दो नित्य-इत्यादिनानानुमितिसा
धारणैकप्रतिबध्यत्वाभावात् तादृशानुमितित्वव्यापिका न कापि
प्रतिबध्यतेत्यसाधारण्याव्याप्तिरिति। न च मुख्यविशेष्यताद्वया
निरूपकत्वेन हेतुमत्तानिश्चयविशेषणान्नोक्तदोष इति वाच्यम्, क्रमि-
कविभिन्नधर्मिकहेतुमत्तानिश्चयद्वयसमानकालीनासाधारण्यनिश्चय-
मादायोक्तदोषतादवस्थ्यात्। अत एव प्रथमकालीनान्तेन मुख्यवि-
शेष्यताद्वयशून्यहेतुमत्तानिश्चयविशिष्टत्वं वक्तव्यम्। मुख्यविशेष्य-
ता च धर्मितावच्छेदकत्वानवच्छिन्नप्रकारत्वानिरूपिता प्रकारत्वान-
वच्छिन्नविशेष्यता। निश्चयवैशिष्ट्यं च सामानाधिकरण्य-स्वाधिकर-
णमुख्यवृत्तित्व-स्वध्वंसवत्त्वैतत्त्रितयसम्बन्धेन, तथाच दोषविषय-
कनिश्चयाव्यवहितपूर्वोत्पन्नैकधर्मावच्छिन्नविशेष्यताकहेतुमत्तानिश्चय-
स्यैव लक्षणघटकत्वान्नोक्तदोष इति परास्तम्। यत्रादौ अपेक्षाबुध्या-
त्मकैकधर्मिकहेतुमत्तानिश्चयस्ततोऽपरधर्मिकनिश्चयस्ततोऽसाधार-
ण्यम्, तत्रोक्तदोषतादवस्थ्याच्च। एतेनोक्तत्रितयसम्बन्धमध्ये
स्वाधिकरणमुख्यवृत्तित्वमपहाय कालिकेन स्वाधिकरणमात्रनिवेश-
नमपि प्रत्युक्तम्।

अत्रोच्यते—स्वसमानकालीननिश्चयीयहेतुप्रकारतानिरूपितवि-
शेष्यतावच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नविशेष्यताकानुमितित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यापकत्वस्य निवेश्यत्वेन तादृशयत्किञ्चिद्धर्मावच्छिन्नविशेष्य-
कानुमितित्वव्यापकत्वस्य तद्धर्मावच्छिन्नविशेष्यकहेतुमत्तानिश्चय-
विशिष्टासाधारण्यज्ञाननिष्ठप्रतिबन्धकताकप्रतिबध्यतायामेव सत्त्वा-
त्साव्याप्तिरिति ध्येयम् ॥

हेतुमत्तानिश्चयश्चात्रावच्छेदावच्छेदेन ग्राह्यः। अतः सामाना-
धिकरण्येनानुमितिं प्रति सामानाधिकरण्येन हेतुमत्ताज्ञानकाली-
नासाधारण्यविषयकनिश्चयस्याप्रतिबन्धकत्वेऽपि न तत्स्थली-
नासाधारण्यव्याप्तिः। अत एव संयोगसम्बन्धेन वह्निसाध्यकतत्-
तद्वावच्छिन्नप्रतियोगितासम्बन्धेन वह्निहेतुकस्थले व्यभि-
चारनिश्चयस्याभावांशे नियतहेतुविषयकत्वेन वह्निमानाधेय-
वृत्त्यादौ च वन्ह्यभावबहृत्याधेयत्वरूपव्यभिचारनिश्चयस्या-
भावांशे हेतुविषयकत्वनैयत्येन लक्षणगमनात् प्रथमकालीनान्ता-
भावत्वप्रयुक्तस्य स्वसमानकालीनहेतुमत्तानिश्चयाप्रसिध्या भट्टाचा-
र्योक्तासम्भवस्यासङ्गतिरिति परास्तम्—अभावत्वाद्यवच्छेदेन हेतुम-
त्तानिश्चयस्य तत्रासत्त्वादिति ॥

अथैवमपि—ह्रदत्वावच्छेदेन जलवद्ध्रदकालीनवह्निसाध्यकज-
लहेतुकस्थले तादृशसाध्यव्यापकीभूताभावप्रतियोगिजलरूपासाधा-
रण्ये लक्षणसमन्वयेऽसम्भवदानासङ्गतिरेवेति। न चाव्यावर्तकस्य
जलवद्ध्रदकालीनत्वस्य प्रमेयधूमत्वादेरिव प्रतियोगितानवच्छे-
दकतया तद्विशिष्टवह्निव्यापकत्वमप्रसिद्धं शुद्धवह्निव्यापकत्वमे-
व प्रसिद्धमिति वह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नमे-
वासाधारण्यमिति तज्ज्ञानस्य च न हेतुविषयतानैयत्यमिति
वाच्यम्, तथापि सामानाधिकरण्यसम्बन्धेन परिणामत्वावच्छे-
देन जन्यगुणविशिष्टपरिमाणस्य समवायेन साध्यतायां सामाना-
धिकरण्यसम्बन्धेन जन्यगुणस्य हेतुत्वे महाप्रलयावच्छेदेन
परमाण्वादौ जन्यगुणविशिष्टपरिमाणाभावस्य सत्त्वात् परिमाण-
सामान्याभावस्य च तत्रासत्त्वात् तस्यातिरिक्तत्वसिद्धेः तादृशाभाव-
वद्वृत्तिजन्यगुणरूपव्यभिचारिनिश्चयस्यावच्छेदकावच्छेदेन हेतुम-
त्तावगाहित्वनियमेन तत्र लक्षणसमन्वयात्। यदि च लाघवेन ज-
न्यगुणवैशिष्ट्यमात्रस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वस्वीका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

रेण तादृशधर्मावच्छिन्नाभावस्याप्यप्रसिद्धिरित्युच्यते,तदापि सामानाधिकरण्यसम्बन्धेन संयोगविशिष्टरूपस्य साध्यत्वे सामानाधिकरण्यसम्बन्धेन संयोगस्य हेतुत्वे, एवं प्रमेयत्वविशिष्टवह्निनिरूपि विषयत्वस्य साध्यत्वे प्रमेयत्वस्य च हेतुत्वे तत्तत्साध्याभा वृत्तिसंयोगादिरूपव्यभिचारेण लक्षणागमनादसम्भवदानासङ्गति र्वारैव । वस्तुतस्तु हेतुमत्तानिश्चयेऽवच्छेदावच्छेद्यत्वावगाहि निवेशनेनैव सामानाधिकरण्येन साध्यतास्थलेऽसाधारण्यसङ्ग सम्भवात् पूर्वोक्तस्थलेऽपि लक्षणसमन्वयसम्भव इति चेत् ।

अत्राहुः-वह्नित्वावच्छेदेन प्रमेयत्वविशिष्टवन्ह्यादेरभावस्य स त्वे प्रमेयत्वस्य हेतुत्वे वह्नेः पक्षत्वे प्रमेयत्वविशिष्टवह्निविशि न्ह्याद्यात्मकबाधे, एवं संयोगविशिष्टरूपस्य साध्यत्वे रूपस्य क्षत्वे संयोगस्य हेतुत्वे संयोगविशिष्टरूपाभाववद्रूपात्मकब चातिव्याप्तिः—तत्रत्यज्ञानानां पक्षतावच्छेदकीभूतवह्नित्वाद्यवच्छेदे न तत्तद्धेतुमत्तावगाहित्वनियमेन स्वसमानकालीनहेतुमत्ता निश्चयीयधर्मितावच्छेदकीभूतपक्षतावच्छेदकरूपयात्किञ्चिद्धर्माव च्छिन्नविशेष्यकानुमितिसामान्यविरोधित्वात्--अतः स्वसमानका लीनहेतुमत्तानिश्चये स्वभिन्नत्वं निवेशनीयम् , तथा चोक्तबाध ज्ञानानां स्वसमानकालीनस्वभिन्नघटः प्रमेय इत्यादिहेतुमत्तानि श्चयीयसमानधर्मितावच्छेदककानुमितिसामान्याविरोधित्वान्नाति व्याप्तिः । एवं च केवलदोषविषयकनिश्चयस्य तादृशनिश्चयसा मान्यान्तर्गतस्य स्वभिन्नस्वसमानकालीननिश्चयाप्रसिध्यैवासम्भ वसङ्गतिः । एवं सति सधर्मितावच्छेदककहेतुमत्तानिश्चयेऽपि स्वभिन्नत्वं निवेश्यम् ,अन्यथा तादृशनिश्चयसामान्यान्तर्गतसमूहाल म्बनहेतुप्रकारकदोषविषयकनिश्चयकालीनस्वभिन्नहेतुमत्तानिश्चयाप्र सिद्ध्याऽसम्भवापत्तिरिति ध्येयम् ॥

यत्तूक्तबाधातिव्याप्तिवारणाय स्वसमानकालीनहेतुमत्तानिश्चयी यमुख्यविशेष्यतावच्छेदकत्वं किञ्चिद्धर्मे निवेशनीयमुक्तबाधादि घटकीभूतहेतुमत्तानिश्चयधर्मितावच्छेदकधर्मस्य तादृशत्वाभावा न्नातिव्याप्तिः। न च प्रमेयवन्ह्यभावादिसाध्यकवह्निपक्षकप्रमेयत्वहेतुक स्थले वन्हिवृत्तिप्रमेयवन्ह्यात्मकबाधेऽतिव्याप्तिस्तादृशबाधनिश्चये वन्ह्यात्मकमुख्यविशेष्यांश एव हेतुभानादिति वाच्यम् । अवच्छिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेष्यत्वानवच्छिन्नत्वस्य मुख्यतायां निवेशनीयत्वात् । अथवा स्वसमानकालीनहेतुमत्तानिश्चयविशेष्यतायामेवावच्छिन्नविशेष्यत्वावच्छिन्नत्वं निवेशनीयम्,तथा चोक्तबाधघटकप्रमेयत्वरूपहेतुप्रकारतानिरूपितमुख्यविशेष्यतायां वह्निवृत्तित्वप्रकारतानिरूपितधर्मिताच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नत्वात् प्रमेयवह्निविशिष्टवन्ह्यात्वाबाधग्रहे च हेतुप्रकारतानिरूपितविशेष्यतायां प्रमेयवह्नित्वावच्छिन्नप्रकारकत्वावच्छिन्नत्वादुक्तबाधघटकधर्मस्य तादृशत्वाभावाद्व्याप्तिः । एवं स्वधर्मितावच्छेदककहेतुमत्तानिश्चयोऽपि मुख्यविशेष्यताशालित्वेन विशेषणीयः । अन्यथा वह्निव्यापकीभूतसंयोगप्रतियोगिजलमित्यादिनिश्चयकालीनजलवद्ध्रदवान् देश इत्यादिनिश्चयीयहेतुप्रकारतानिरूपितमुख्यविशेष्यतावच्छेदकाप्रसिद्धेऽसम्भवापत्तेः । एवं च प्रथमकालीनान्तानुक्तौ—उक्तव्यभिचारसामान्यान्तर्गतकेवलदोषविषयकनिश्चयसमानकालीनहेतुमत्तानिश्चयीयतादृशविशेष्यतावच्छेदकाप्रसिद्ध्याऽसम्भवो निष्प्रत्यूह एवेति।

तत्तुच्छम्—वह्निमान् आधेयत्वादित्यादौ वन्ह्यभाववद्वृत्त्याधेयत्वरूपव्यभिचारानिश्चयस्याधेयत्वरूपमुख्याविशेष्यांशे हेतुप्रकारस्य समानकालीनहेतुमत्तानिश्चयीयमुख्यविशेष्यतावच्छेदकस्य सुप्रसिद्धतया तादृशव्यभिचार एव लक्षणगमनसम्भवेन प्रथमकालीनान्तानिवेशप्रयुक्तासम्भवदानासङ्गतितादवस्थ्यात्,ह्रदो वह्निमान् वन्ह्यभावादित्यादौ वह्न्यभाववद्ध्रदात्मकबाधनिश्चयसमानकालीनहेतुमत्तानिश्चयीयमुख्यविशेष्यतावच्छेदकीभूतकिञ्चिद्धर्मपदेन ह्रदत्वमादाय वह्न्यभाववद्ध्रदात्मकबाधेऽतिव्याप्तितादवस्थ्याच्चेति ध्येयम् ॥

परे तु नानाधर्मावच्छिन्नविशेष्यकहेतुमत्ता निश्चयकालीनासाधारण्यविषयकनिश्चयस्य तादृशनिश्चयसामान्यान्तर्गतस्य स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितित्वस्य विभिन्नधर्मितावच्छेदककविभिन्नानुमितिसाधारणस्य व्यापकासाधारण्यशानीयैकप्रतिबध्यत्वाप्रसिद्ध्याऽसाधारण्याव्याप्तिवारणाय स्वसमानकालीनहेतुमत्तानिश्चयस्य व्यापिका यानुमितिस्तादृशानुमितित्वव्यापकत्वं प्रतिबध्यतायां निवेशनीयम्।व्याप्यव्यापकभावश्च निरवच्छिन्नधर्मितावच्छेदकतासम्बन्धेन,तथाच स्वसमानकालीननानाधर्मावच्छिन्नविशेष्यकनानाहेतुमत्तानिश्चयानां तादृशसम्बन्धेन व्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

पिका तत्तद्धर्मावच्छिन्नविशेष्यकसमूहालम्बनानुमितिरेवेति तादृशानुमितित्वव्यापकत्वं प्रतिबध्यतायामक्षतमेव । अत्राप्युक्तबाधाद्यतिव्याप्तिवारणदिशाऽसम्भवसङ्गतिरिति प्राहुः ॥

केचित्तु उक्तरीत्या प्रतिबध्यतायामनुमितित्वव्यापकत्वरक्षणसधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितित्वव्यापकस्वनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतातादृशविशिष्टत्वमिति लक्षणं व्याचक्षाणा उक्तबाधातिव्याप्तिं वारयन्ति हेतुमत्तानिश्चयसमानकालीनदोषविषयकनिश्चयस्य स्वसमानकालीनहेतुमत्तानिश्चयाप्रसिद्ध्याऽसम्भवः।यादृशदोषविषयकनिश्चयो हेतुमत्ताज्ञाननैयत्यं तादृशदोषलक्षणसम्भवाभाव इत्येवासम्भवार्थ इति प्रलपन्ति ॥

अथात्र वह्निमद्ध्रदकालीनवह्निमान् जलवद्ध्रदकालीनह्रदत्वादित्यादौ वन्हिव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्यघनात्मकेऽतिव्याप्तिः हेतुमत्तानिश्चयकालीनस्य तन्निश्चयसामान्यस्यैव वह्निमद्ध्रदावगाहितादृशानुमितिसामान्यविरोधित्वात् इति चेन्न । ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नत्वोभयाभाववत्त्वस्य प्रतिबन्धकतायां निवेशेनैवोक्तातिव्याप्तिवारणसम्भवात् । न चैवमुक्तस्थले वन्ह्यभाववद्ध्रदादिविषयताया हेतुमत्तानिश्चयसमानधर्मितावच्छेदककप्रकृतसाध्यानुमितित्वव्यापकप्रतिबध्यतानिरूपितताद्दशोभयाभाववत्प्रतिबन्धकतानातिरिक्तवृत्तितया वन्ह्यभाववद्ध्रदादावतिव्याप्तिरिति वाच्यम् । प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वदलेनतद्वारणादिति ध्येयम् ॥

केचित्तु असाधारण्यविषयकत्वानवच्छिन्नं यत् प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वं तदन्यत्वस्य लक्षणघटकप्रतिबन्धकतायामनुमितिसाधारण्यविरोधित्वमित्यनेन विवक्षणीयतयोक्तस्थले वह्निव्यापकीभूताभावप्रतियोगिजलविषयकत्वावच्छिन्नप्रतिबन्धकताया असाधारण्यविषयकत्वानवच्छिन्नत्वात् तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितत्वाच्च नातिव्याप्तिरित्याहुः । तच्चिन्त्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परेतु समूहालम्बनतादृशानुमितित्वव्यापकप्रतिबध्यतायां वि-
शिष्टसाध्यग्रहत्वन्यूनवृत्तित्वनिवेशान्नोक्तातिव्याप्तिः। न चैवमुक्तस्थ-
वह्निव्यापकीभूताभावप्रतियोगिह्रदत्वरूपासाधारण्येऽव्याप्तिः के-
ह्रदत्वधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनतादृशासाधार-
नश्चयस्यापि तादृशनिश्चयसामान्यान्तर्गतत्वेन तत्समानकालीन-
त्तानिश्चयसमानधर्मितावच्छेदककह्रदत्वावच्छिन्नविशेष्यकानु-
त्वव्यापकप्रतिबध्यताया विशिष्टसाध्यग्रहत्वव्यापकत्वादिति
म् ,विशिष्टसाध्यघटकधर्मनिष्ठधर्मितावच्छेदकताशून्यत्वेन स-
तावच्छेदककहेतुमत्तानिश्चयस्य विशेषणीयत्वेनोक्तस्थले ह्रद-
र्मितावच्छेदककहेतुमत्तानिश्चयस्य लक्षणघटकत्वादुक्तासाधा-
च घटत्वादिधर्मितावच्छेदककहेतुमत्तानिश्चयमादायैव लक्षण-
न्वयादिति ॥

अथवा–हेतुमत्तानिश्चये उक्तावच्छेदकताशून्यत्वनिवेशने उक्त-
नवृत्तित्वमनिवेश्य प्रतिबध्यतायां विशिष्टसाध्यघटकधर्मावच्छि-
नुख्यविशेष्यत्वानवच्छिन्नत्वं निवेश्यापि उक्तातिव्याप्तिर्वारयितुं श-
क्यते–इत्याहुः ।

अथ साध्याभावतद्व्याप्यधर्मितावच्छेदककहेतुमत्तानिश्चयका-
लीनदोषविषयकनिश्चयस्यापि तादृशनिश्चयसामान्यान्तर्गततया त-
त्समानकालीनहेतुमत्ताधर्मितावच्छेदकीभूतसाध्याभावादिधर्मितावच्छेदककसाध्यानुमितेरप्रसिध्या असंभवः। न च धर्मितावच्छेद-
कतायां निरवच्छिन्नत्वस्य निवेशितत्वान्नासंभव इति वाच्यम् । त-
थापि द्रव्यभेदसाध्यकगुणवत्त्वहेतुकस्थले द्रव्यभेदव्यापकीभूताभा-
वप्रतियोगिगुणरूपासाधारण्येऽव्याप्त्यापत्तेः । द्रव्यत्वनिष्ठनिरव-
च्छिन्नधर्मितावच्छेदकताकगुणवत्त्वरूपहेतुमत्तानिश्चयकालीनदोष-
विषयकनिश्चयसमानकालीनहेतुमत्तानिश्चयधर्मितावच्छेदकीभूतद्र-
व्यत्वधर्मितावच्छेदककद्रव्यभेदसाधारण्यानुमितेरप्रसिद्धेरिति चेन्न।
अनाहार्यज्ञानीयसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्य-
तावच्छेदकीभूतधर्मावच्छिन्नविशेष्यताकहेतुमत्तानिश्चयकालीनत्व-
स्य कालीनत्वान्तेन विवक्षितत्वादिति ध्येयम् ।

अथ सधर्मितावच्छेदककहेतुमत्तानिश्चयीययादृशविशिष्टविषय-
कनिश्चयसामान्यमित्यत्र सामान्यपदस्य व्यापकात्मकतया तादृशनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चयत्वव्यापकतालाभः। तथा च निश्चयस्याप्राक्रान्ततया स्वपदेन तस्य बोधयितुमशक्यत्वात् स्वपदेन तादृशनिश्चयत्वस्यैव धर्तव्यत्वेन तत्क लीनत्वस्याव्यावर्तकतया स्वाश्रयकालीनत्वमेव निवेशनीयम्, तथ सति तादृशदोषनिषयकनिश्चयकालीनत्वस्य तादृशदोषविषयक श्चयकालीनधर्मिका यावन्तो हेतुमत्तानिश्चयाः सम्भवन्ति तावत् सत्त्वादसाधारण्याव्याप्त्यापत्तेः पूर्वोक्तरीत्या वारणेऽपि बाध तिव्याप्तिर्दुर्वारैव तादृशनिश्चयत्वाश्रयकालीनहेतुमत्तानिश्चय तावच्छेदकादिरूपयत्किञ्चिद्धर्मस्य सर्वस्य सर्वत्र ग्रहीतुं त्वादिति। न च तदर्थेन तादृशनिश्चयव्यापकत्वमेव निवेश तथा च स्वपदेन तत्तन्निश्चयमादाय सर्वत्र लक्षणं संगमनीय नाव्याप्तिरिति वाच्यम्, व्याप्यदिश्यनुगतरूपेण तादृशनिश्च निश्चयनिवेशे व्यापकदिशि सत्त्वघटितधर्मनिवेशे व्याप्यव्याप भावसम्भवात् स्वत्त्वस्यानुगततया तदघटितधर्मस्य व्यापक वच्छेदकत्वाभावादिति चेत्।

अत्र केचित्-प्रकृतसाध्यविषयकप्रकृतहेतुधर्मिकप्रकृतसाध्या रूपितव्याप्तिप्रकारतानुमितिविशिष्टान्यत्वानतिरिक्तवृत्तिविषायतानि रूपकतावच्छेदकरूपवत्त्वघटितमेव लक्षणं वक्तव्यमतो नोक्तदोषः। तादृशानुमितिविशिष्टत्वं च स्वनिष्ठभेदप्रतियोगितावच्छेदकत्व स्वी यसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकाव च्छिन्नविशेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनि श्चयकालीनत्वोभयसंबंधेन। भेदप्रतियोगितावच्छेदकत्वं च स्वनिष्ठ प्रतिबन्धकतानिरूपितप्रतिबध्यत्वसंबंधेन। संबंधस्य व्यावृत्तिः स्व यमूह्येत्याहुः। तच्चिन्त्यम्॥

वस्तुतस्तु सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयद्रूपा वच्छिन्नविषयकनिश्चयत्वव्यापकतावच्छेदकं ज्ञानत्वं तद्रूपपरत्वं लक्षणम्। व्यापकता च स्वतादात्म्य-स्वसमानकालीनहेतुमत्तानि श्चयीयधर्मितावच्छेदकावच्छिन्नविशेष्यकप्रकृतसाध्यविधेयकप्रकृतहे तुधर्मिकप्रकृतसाध्यव्याप्तिप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरू पितप्रतिबंधकतावत्त्वोभयसंबंधेनेति ध्येयम्।

कश्चित्समाधत्ते-सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयद्रू पावच्छिन्नविषयकनिश्चयसामान्यं प्रकृतसाध्यप्रकारकप्रकृतहेतुधर्मि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कप्रकृतसाध्यव्याप्तिप्रकारकानुमित्यवृत्ति तद्रूपत्वम् । तादृशानुमिति-
वृत्तित्वं च स्वसमानकालीननिश्चयीयहेतुतावच्छेदकावच्छिन्नप्रका-
रानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्य-
तावच्छेदकावच्छिन्नप्रकारताकत्व-स्वनिष्ठप्रतिबन्धकतानिरूपितप्र-
तिबन्ध्याभाववत्वत्वोभयसंबंधेन । एतत् पुनश्चिन्त्यम् ॥

ननु वह्निमान् अवृत्तिजलादित्यादौ अनाहार्यहेतुमत्तानिश्चयाप्र-
सिद्धया ऽव्याप्तिः अवृत्तिजलवानित्यादिनिश्चयस्य नियताहार्यत्वात् ।
हेतुतावच्छेदकतापर्य्याप्त्यनिवेशाद्धेतुतावच्छेदकीभूतशुद्धज-
लावच्छिन्नवत्तानिश्चयस्यानार्य्यस्य प्रसिद्धया तत्कालीनवह्निव्याप-
कताभावप्रतियोगिजलादिनिश्चयमादायैव तादृशजलादौ लक्षण-
समन्वय इति वाच्यम् । तथासति वह्निमान् काञ्चनमयजलाद्जलशै-
वालोभयस्मादित्यादौ काञ्चनमयवानित्यादिहेतुमत्तानिश्चयकालीन-
वह्निव्यापकीभूताभावप्रतियोगिजलमिति निश्चयस्यापि तादृशनिश्चय-
मान्यान्तर्गततया तस्यानुमित्यप्रतिबन्धकत्वाद्वह्निव्यापकीभूताभा-
वप्रतियोगिजलात्मकासाधारण्येऽव्याप्तेरिति चेन्न ।

निश्चयविशिष्टान्यहेतुतावच्छेदकताश्रयधर्मावच्छिन्नप्रकारकसध-
र्मितावच्छेदककनिश्चयनिवेशेनैवोक्तदोषवारणसम्भवात् । निश्चयवैशि-
ष्ट्यं च स्वनिष्ठासाधारण्यविषयित्वावच्छिन्नप्रतिबन्धकतानवच्छेद-
ककिञ्चिद्धर्मावच्छिन्नविषयितावत्त्व-स्वसमानकालीनत्व-स्वसामाना-
धिकरण्यैतत्त्रितयसम्बन्धेन । तथाचोक्तस्थले एवंभूतं हेतुम-
त्ताज्ञानं वह्निव्यापकीभूताभावप्रतियोगिजलज्ञानकालीनजलवान्
ह्रद इति ज्ञानमेवेति तत्कालीनासाधारण्यविषयकनिश्चयमादा-
यैव लक्षणसंगतिः ॥ प्रथमसम्बन्धानिवेशे निश्चयमात्रस्यैव वै-
शिष्ट्यसत्त्वात् निश्चयविशिष्टान्यनिश्चयस्यैवाप्रसिद्धिरतस्तन्निवे-
शः । जलशैवालोभयहेतुकस्थले वह्निव्यापकीभूताभावप्रतियो-
गिजलवह्निव्यापकीभूताभावप्रतियोगिशैवालोभयस्यैवासाधारण्यत-
यैकघटितासाधारण्यविषयकनिश्चयकालीनहेतुमत्तानिश्चयस्यान्यघ-
टितासाधारण्यविषयकनिश्चयविशिष्टत्वादव्याप्तिरतो द्वितीयस-
म्बन्धनिवेशः । तन्निवेशे चैकघटितासाधारण्येऽन्यघटितासा-
धारण्यविषयकनिश्चयासमानकालीनस्वघटकहेतुतावच्छेदकीभूतध-
र्मावच्छिन्नवत्तामादायैव लक्षणसमन्वयः । तृतीयस्य फलं पुरुषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरीयनिश्चयमादायाव्याप्तिवारणम् ।

यद्वा हेतुतावच्छेदकघटकयत्किञ्चिद्धर्मावच्छिन्नवत्तानिश्चयका-
लीनयादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुम-
निश्चयसमानधर्मितावच्छेदककानुमितिसामान्यविरोधि तादृश-
मेव लक्षणम् । उक्तस्थले च यत्किंचिद्धर्मपदेन हेतुतावच्छेदकघट-
जलत्वमादायैव लक्षणं संगमनीयम् । अतएव वह्निमान् वह्निसमाना-
करणाभावप्रतियोगितावच्छेदकीभूताभावत्वकालीनजलादित्या-
भावत्वावच्छेदेन तादृशावच्छेदकत्वावगाहिप्रकृतहेतुमत्तानि-
कालीनस्य वह्निव्यापकीभूताभावप्रतियोगिअभावत्वकालीनजल-
पासाधारण्यविषयकनिश्चयस्य नियताहार्य्यतया तादृशासाधार-
व्याप्तिरित्यपि निरस्तम् । यत्किञ्चितपदेनोक्तहेतुतावच्छेदकघट-
ववत्त्वकालीनजलत्वमादायैव तत्र लक्षणसमन्वयादिति ध्येयम् ॥१

सर्वमाकाशवत् प्रमेयत्वादित्यादिस्थलीयबाधप्रतिरोधयोर-
व्याप्तिः सर्वमाकाशाभाववदित्यादिनिश्चये सति क्वचिदप्याकाशाद-
मितेरनुदयात् अनुभवानुरोधेनासमानधर्मितावच्छेदककज्ञानेऽपि-
त्प्रतिबन्धकत्वकल्पनात्तयोरनुमितिसामान्यविरोधित्वादतः सर्वं सा-
ध्याभाववत्तद्वयाप्यवद्वेत्यादिकन्तु साध्यवत्त्वग्रहविरोधित्वेन सामा-
नाधिकरण्यग्रहविरोधि, साध्यानुमितिसामान्याविरोधित्वं वा विशे-
षणमित्युक्तं दीधितिकृता । निर्धर्मितावच्छेदककज्ञानस्य बाधाद्यप्रति-
बध्यत्वे सामानाधिकरण्यग्रहस्य साध्यांशे निर्धर्मितावच्छेदकतया
तदविरोधित्वमुक्तबाधादेरक्षतमेवेति, इत्याशयेनाहानुमितिसामा-
न्याविरोधित्वं वेति भट्टाचार्येणोक्तम् ।

अथात्र विरोधवारकसाध्यसमानाधिकरण्यग्रहाविरोधित्वदले
साध्यवत्त्वांशेऽधिकरणत्वस्य धर्मितावच्छेदकसामानाधिकरण्यग्र-
हाविरोधित्वनिवेशेनैव उक्तबाधेऽतिव्याप्तिवारणसम्भवे कृतमनुमि-
तिसामान्याविरोधित्वरूपातिरिक्तविशेषणेनेति । न च यत्र गगनं
साध्यमधिकरणत्वं हेतुस्तत्र गगनाभाववदधिकरणात्मके व्यभिचा-
रेऽव्याप्तिभियाऽधिकरणत्वस्य धर्मितावच्छेदकत्वनिवेशासंभव इति
वाच्यम् । अधिकरणत्वसामानाधिकरण्येन गगनाभावस्यैव तत्र व्य-
भिचारतयाऽधिकरणत्वसामानाधिकरण्येन साध्यसामानाधिकर-
ण्यग्रहाविरोधित्वस्य तत्र सत्त्वेनाव्याप्त्यनवकाशात् । एवं यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यमभाववदवृत्ति सत्त्वादित्वादौ द्रव्यत्वाभाववद्वृत्तिसत्तात्मकव्यभिचाराव्याप्तिभिया साध्यसाधनसामानाधिकरण्यग्रहत्वाव्यापकस्य प्रतिबध्यताया निवेश्यतया व्याप्तिज्ञानत्वावच्छिन्नप्रतिबध्यतादायैवोक्तव्यभिचारसंग्रहसंभवाच्चेति चेन्न। यत्र गगनस्य साधुता गगनाभाववदधिकरणस्य हेतुता तत्र साध्यांशेऽधिकरणत्वधर्मितावच्छेदककस्य प्रकृतहेतुधर्मिकसाध्यसामानाधिकरण्यज्ञानप्रतिबन्धाहार्य्यस्याऽसम्भवेनाधिकरणत्वस्य धर्मितावच्छेदकत्वनिवेशात्। एवं यत्राधिकरणत्वाभावस्य साध्यता तत्र साध्यांशेऽधिकरणत्वधर्मितावच्छेदककसाध्यसामानाधिकरण्यज्ञानस्य नियतप्रतिबन्धाहार्य्यतया तन्निवेशासम्भवाच्चेति ध्येयम्। न चैतावताधिकरणत्वस्य धर्मितावच्छेदकत्वनिवेशासम्भवेऽपि साध्यांशे सधर्मितावच्छेदककसाध्यसामानाधिकरण्यग्रहाविरोधित्वनिवेशेनैव सामञ्जस्यमिति वाच्यम्, तस्यापि प्रकारान्तरत्वादिति ध्येयम्॥ १५॥

इति श्रीकालीशङ्करसिद्धान्तवागीशविरचितं सव्यभिचारक्रोडपत्रम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDF

॥ श्रीगणेशायनमः ॥

॥ श्री कालीशंकराभ्यां नमः ॥

अथ श्रीकालीशङ्करसिद्धान्तवागीशविरचितं सटिप्प

साधारणक्रोडपत्रम् ।

यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य
बन्धकत्वं तादृशज्ञानान्तरसहिततादृशविशिष्टविषयकज्ञानान
करणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताविरहवत्त्वे
यादृशविशिष्टविषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं त
त्वमिति मिश्रमतं भट्टाचार्येणोक्तम्

नन्वत्र तादृशज्ञानान्तरसहिततादृशविशिष्टविषयकज्ञानान
करणक्षणवृत्तित्वविशिष्टेत्यत्र अनधिकरणत्वं किं यादृशयत्किञ्चि
धिकरणत्वाभावः किम्वा तादृशाधिकरणत्वसामान्याभावः तादृश
धिकरणत्वाभावकूटवत्त्वं वा ॥ नाद्यः तादृशज्ञानद्वयाधिकरणक्षण
स्यापि तादृशज्ञानसहितस्य ज्ञानव्यक्त्यन्तरस्यानधिकरणत्वेन ज्ञान
द्वयकालेप्ययोगोलकवृत्तिवन्ह्याद्यात्मकव्यभिचारादेरसंग्रहापत्तेः ।
नापि द्वितीयः यत्वतत्त्वयोरननुगमेन धूमाभाववदयोगोलकं अयो
गोलकवृत्तिर्वन्हिरिति ज्ञानद्वयास्यायोगोलकवृत्तिर्वन्हिरयोगोलक
वृत्तिर्धूमाभाव इति ज्ञानद्वयस्य धूमाभाववदयोगोलकं वन्हिम
दयोगोलकमितिज्ञानद्वयस्य अयोगोलकवृत्तिर्धूमाभावः वन्हिमदयो
गोलकमितिज्ञानद्वयस्य चाधिकरणसाधारणानुगतानतिप्रसक्तरूपा
भावादसम्भवापत्तेः । नापि तृतीयः जलवान् वन्ह्यभाववान्
जलवान् ह्रद इति ज्ञानद्वयकालेऽपि अयोगोलकवृत्तिवन्ह्यादेर्व्य
भिचारितापत्तेः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकीभूत
यावज्ज्ञानस्यैव यादृशज्ञानान्तरपदेन ज्ञानवैशिष्ट्यावच्छिन्नप्रति
बन्धकतावच्छेदकविषयिताकयावद्विशिष्टस्यैव च यादृशविशिष्ट
पदेन प्रतिपाद्यतया जलवान् वन्ह्यभाववानिति ज्ञानसहितजलव
द्ध्रदविषयकज्ञानाधिकरणत्वाभावस्यापि तादृशाधिकरणत्वाभावकू
टान्तर्गततया जलवान् वन्ह्यभाववान् जलवान् ह्रद इत्यादिज्ञानशून्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालस्यैव तादृशाधिकरणत्वाभावकूटवत्क्षणत्वेन तादृशक्षणवृत्तित्व-विशिष्टविषयिताविरहस्य तदानीमक्षतत्वादिति ।

अत्राहुः–एकैकाविशिष्टमादाय यादृशयादृशज्ञानविशिष्टत्वेन या-दृविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वं तादृशतादृशज्ञानसहितता-दाविशिष्टविषयिताकज्ञानाधिकरणत्वाभावकूटवत्क्षणवृत्तित्ववि-शिष्टतादृशविशिष्टपर्याप्तविषयताविरहकूटवत्त्वमेव विवक्षणीयम् । चायोगोलकवृत्तिवह्निरूपविशिष्टोपादाने तद्विषयकज्ञाननिष्ठ-प्रतिबन्धकतायामवच्छेदकं धूमाभाववदयोगोलकं अयोगोलकवृ-त्तिधूमाभाव इत्यादिज्ञानस्य वैशिष्ट्यमेव, न तु जलवान् वह्न्य-भाववान् जलवान्-ह्रद इत्यादिज्ञानस्य वैशिष्ट्यमिति–जलवा-न् वह्न्यभाववान् इति ज्ञानकालेऽयोगोलकवृत्तिवह्न्यात्मकव्य-वहारे नातिव्याप्तिः । जलवान् वह्न्यभाववान् जलवान्–ह्रद इत्यादिज्ञानद्वयाधिकरणत्वाभावस्यायोगोलकवृत्तिवह्निरूपविशिष्टप-र्याप्तविषयताविरहप्रतियोगिकोट्यप्रविष्टत्वादिति ॥

वस्तुतस्तु धर्मविशिष्टविषयताविरहवत्त्वमेव सत्यन्तदलार्थः । विशिष्टयञ्च स्वपर्याप्तत्व–स्वनिरूपितविषयताशालिनिश्चयत्वावच्छि-न्नप्रतिबन्धकतावच्छेदकीभूतज्ञानसहितस्वविषयताशालिज्ञानानधि-करणक्षणवृत्तित्वैतदुभयसम्बन्धेन, नातः पूर्वोक्तदोषाणामवकाशः ॥

न चायोगोलकवृत्तिवह्नि व्याप्तयाभाववानितिज्ञानकालीनायो-गोलकवृत्तिर्वह्निरिति ज्ञानकालेऽयोगोलकवृत्तिवह्नौ व्याप्त्यभाववदयो-गोलकवृत्तित्ववति च तदानीं व्यभिचारानात्मकेऽतिव्याप्तिः।एवं वह्नि-धूमवान्वह्निरित्यादौ धूमाभाववदयोगोलकवृत्तित्ववदयोगोलकवृत्तिव-ह्निरिति ज्ञानकाले चायोगोलकवृत्तिवह्न्यादावतिव्याप्तिः । अयोगोल-कवृत्तित्ववद्धूमाभाववदित्यादिज्ञानस्यापि अयोगोलकवृत्तिवह्न्यात्म-कविशिष्टविषयकज्ञाननिष्ठप्रतिबन्धकतावच्छेदकतयाऽयोगोलकवृत्ति-त्ववद्व्याप्त्यभाववदित्यादिज्ञानसहितायोगोलकवृत्तिवह्निविषयकज्ञाना-धिकरणत्वाभावस्यापि अयोगोलकवृत्तिवह्निपर्याप्तिविषयताविरहप्र-तियोगिकोटिप्रविष्टत्वादिति वाच्यम्। एतत्समाधानस्याग्रे वक्ष्यमाण-त्वादिति ध्येयम् ॥

अत्र च तादृशज्ञानसहिततादृशविशिष्टविषयकज्ञानानाधिकरण-क्षणवृत्तित्वेत्यत्र यदवच्छेदेन तादृशज्ञानानाधिकरणत्वं तदवच्छेदेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDF

तादृशानधिकरणक्षणवृत्तित्वं विवक्षणीयम्। तादृशज्ञानाधिकरणत्वाभा-
ववत्त्वमेव वा निरवच्छिन्नत्वं ग्राह्यमेतल्लाभार्थमेव क्षणपदोपादानम्,
अन्यथा स्थूलकालस्यैव क्षणपदार्थतया पूर्वदण्डाद्यवच्छेदेन
ज्ञानद्वयाधिकरणस्थूलकालस्य तादृशज्ञानाधिकरणत्वेन ज्ञानद्व
कालेऽपि सत्यन्तदलासत्त्वप्रसङ्गादिति ध्येयम्।

अथात्र पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयो न वह्नि
पर्वतश्च पाषाणमय इति ज्ञानद्वयकाले पाषाणमयत्ववत्पर्वतादाव
व्याप्तिः-तदानीं तत्र सत्यन्तदलस्य विशेष्यदलस्य च सत्त्वात्, एवं
वह्निमान् जलादित्यादौ वह्निव्यापकीभूताभावप्रतियोगि जलं ज
वांश्च ह्रद इत्यादिज्ञानकाले जलवद्ध्रदादावतिव्याप्तेश्चेति चेन्न।

विशिष्टसाध्यसाधनसामानाधिकरण्यग्रहत्वाव्यापकप्रकृतहेतु
र्मिकप्रकृतसाध्यनिरूपितान्वयव्याप्तिग्रहत्वव्यापकप्रतिबध्यत्वानि
पितत्व-ज्ञानैवशिष्ट्यावच्छिन्नत्व-असाधारण्यविषयित्वानवच्छिन्न
तत्त्रित्वावच्छिन्नाभाववत्त्वेन विशेष्यदलघटकप्रतिबन्धकताविशे
णेनैवोक्तातिव्याप्तिवारणसंभवादिति॥ धूमवान् वह्नेरित्यादौ अयोग
लकं धूमाभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानद्वयकाले व्याप्तिज्ञान-
प्रतिबंधकतामादायायोगोलकवृत्तिवन्ह्याद्यात्मकव्यभिचारे लक्षणग-
मनाय निरुक्तत्रितयाभावप्रतियोगिकोटौ अनिरूपितान्तनिवेशः।
काञ्चनमयधूमवान् वह्नेरित्यादौ नीलत्ववान् काञ्चनमयत्वाभाववान्
नीलत्ववांश्च धूम इत्यादिज्ञानीयप्रतिबन्धकतायां व्याप्तिग्रहत्व-
व्यापकप्रतिबध्यत्वानिरूपितत्वासत्त्वेन निरुक्तत्रितयाभावसत्त्वात्तामा-
दायोक्तज्ञानद्वयकाले नीलत्ववद्धूमादावतिव्याप्तिवारणाय प्रतिबध्य-
तायां हेतुसाध्यकसामानाधिकरण्यग्रहत्वाव्यापकत्वनिवेशः॥
बाधादावसाधारण्ये चातिव्याप्तिवारणायान्तिमयोर्निवेशः।

न च तथापि वह्निर्धूमवान् वह्नेरित्यादावयोगोलकवृत्तित्ववद्धूमा-
भाववदयोगोलकवृत्तिर्वह्निरित्यादिज्ञानकालेऽयोगोलकवृत्तिवन्ह्यादा-
वतिव्याप्तिः अयोगोलकवृत्तित्ववद्धूमाभाववदिति ज्ञानविशिष्टत्वेना-
योगोलकवृत्तिर्वह्निरिति ज्ञानस्य साध्यवत्ताज्ञानप्रतिबन्धकत्वेन सत्य-
न्तस्य निरुक्तत्रित्वावाच्छिन्नाभावाविशिष्टव्याप्तिज्ञानप्रतिबन्ध-
कतामादाय विशेष्यदलस्य च तत्र सत्त्वादिति वाच्यम्। याद-
शज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्यत्रापि प्रतिबन्धकतायां विशिष्टसाध्यसाधनग्रहत्वाव्यापक-
व्याप्तिग्रहत्वव्यापकप्रतिबध्यत्वानिरूपितत्वासाधारण्यविषयित्वान-
च्छिन्नत्वोभयाभावस्य निवेशनीयत्वात्,तथा चायोगोलकवृत्तित्वव-
ह्न्यभावविदितिज्ञानस्य यादृशज्ञानान्तरपदेन धर्तुमशक्यत्वेन धू-
माभाववदयोगोलकमितिज्ञानस्य धर्तव्यतया धूमाभाववदयोगोलक-
मादिज्ञानशून्यकाले नोक्तातिव्याप्तिः । तादृशज्ञानकाले च
लक्ष्यत्वमेव । काञ्चनमयवह्निमान् वह्नेरित्यादौ-अयोगोलक-
वत्काञ्चनमयत्वाभाववत्अयोगोलकवृत्तिर्वह्निरिति ज्ञानद्व-
लयोगोलकवृत्तिवह्न्यादावतिव्याप्तिवारणाय विशिष्टसाध्य-
तग्रहत्वाव्यापकेति । न च वाच्यं गगनादित्यादौ यादृशज्ञाना-
विशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य निरुक्तोभयाभाववत्प्र-
तिबन्धकत्वं तादृशविशिष्टमेवाप्रसिद्धमिति वाच्यम् । वाच्यत्वव्याप-
कीभूताभावप्रतियोगिगगनात्मकासाधारण्यस्यैव प्रसिद्धत्वादिति
वाच्यम् ॥ न च तथाप्ययोगोलकवृत्तित्ववद्व्याप्त्यभाववत्अयोगोलक-
वृत्तिर्वह्निरिति ज्ञानकाले वृत्तिमद्धूमव्याप्त्यभाववद्वृत्तिर्वह्निरिति ज्ञा-
नकाले चायोगोलकवृत्तिवह्नौ वृत्तिवह्नौ च व्याप्त्यभावावच्छेदकत्वेन
गृहीतधर्मवत्ताज्ञानीयप्रतिबन्धकतायां निरुक्तत्रितयाभावसत्त्वात्ता-
मादायातिव्याप्तिरिति वाच्यम् । किञ्चिद्धर्मावच्छिन्नविशेष्यकसा-
मानाधिकरण्येन व्याप्तिनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्र-
तिबध्यतावच्छेदकविषयताशालिज्ञानविशिष्टान्यज्ञानवृत्तित्वेनापि वि-
शेष्यदलसत्यन्तदलघटकप्रतिबन्धकतयोर्विशेषणीयत्वात् । नि-
रुक्तप्रतिबध्यतावच्छेदकविषयताशालिज्ञानवैशिष्ट्यस्यैकक्षणाव-
च्छिन्नैकात्मवृत्तित्वसम्बन्धेन । तथा च व्याप्त्यभावावच्छेदकत्वेन
गृहीतधर्मवत्ताज्ञानीयप्रतिबन्धकतायां व्याप्त्यभावावच्छेदकत्वेन गृ-
हीतो यो धर्मस्तद्धर्मावच्छिन्नविशेष्यकसामानाधिकरण्येन व्याप्ति-
निश्चयप्रतिबध्यतावच्छेदकविषयताशालिज्ञानविशिष्टान्यज्ञानवृत्ति-
त्वाभावान्नोक्तातिव्याप्तिः । यदि च यत्र स्थले किञ्चिद्धर्मिकसामा-
नाधिकरण्येन व्याप्तिनिश्चयप्रतिबध्यतावच्छेदकविषयिताकविशि-
ष्टस्य धूमाभाववद्वृत्तिजलवद्ध्रदो धूमवान् वह्नेरित्यादिस्थलीयपक्षादे-
र्घटकता तत्रत्यबाधादावव्याप्तिरित्युच्यते । तदा ज्ञानवैशिष्ट्यावच्छि-
न्नत्व-निरुक्तप्रतिबध्यतावच्छेदकविषयिताशालिज्ञानविशिष्टान्यज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDH

नावृत्तित्वोभयाभाववत्त्वमेव प्रतिबन्धकतायां निवेश्यमिति ध्येयम्*।

ननु तथापि धूमवान् धूमव्याप्त्यभाववद्घटकालीनवह्नेरित्यादौ अयोगोलकवृत्तितादृशवह्निरूपव्यभिचारेऽव्याप्तिस्तत्र व्यभिचारज्ञान प्रतिबन्धकताया घटधर्मिकव्याप्तिधीप्रतिबध्यतावच्छेदकविषय शालिज्ञानविशिष्टान्यज्ञानावृत्तित्वज्ञानवैशिष्ट्यावच्छिन्नत्वोभयसत्त्वे न धर्तुमशक्यत्वादिति चेत्, न—किञ्चिद्धर्मावच्छिन्नधर्मिक ज्ञानप्रतिबध्यतायां स्वावच्छिन्नविषयत्वाव्यापकत्वनिवेशात् इत्थञ्चोभयाभावोपि न निवेश्यः—पूर्वोक्तनिवेशेनैव चरितार्थ दिति ध्येयम्॥

अथात्र धूमवान् वह्नेरित्यादौ धूमाभाववद्ध्रदाद्यात्मकवाय ह्रदविशेष्यकवह्निप्रकारकज्ञानशून्यकालेऽव्याप्तिः निरुक्तबाधविष ज्ञानस्यापि ह्रदो वह्निमानित्याकारकज्ञानान्तरविशिष्टत्वेनानुमितौ प्त्यंशे प्रतिबन्धकतया ह्रदो वह्निमानित्यादिज्ञानशून्यकाले तत्र त्यन्तदलविरहादिति। न च दशाविशेष एव बाधादेर्लक्ष्यत्वमिति च्यम्। बाधादेर्नित्यदोषतायाः सर्ववादिसिद्धत्वादिति चेत्।

---

* परे तु पाषाणमयत्ववत्पर्वतादावतिव्याप्तिवारणाय लक्षणघटकप्रतिबन्धकतायां प्रकारताविशिष्टान्यत्वे सति प्रकारताविशिष्टान्यत्वं निवेशनीयं। प्रथमवैशिष्ट्यं च स्वनिरूपकज्ञानवैशिष्ट्यावच्छिन्नत्व-स्वनिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतानिरूपितविशेष्यत्वोभयसम्बन्धेन। प्रकारतायां विशेष्यतावच्छेदकतावैशिष्ट्यञ्च स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन। स्वं ग्राह्याभावप्रकारता। द्वितीयवैशिष्ट्यं च स्वनिरूपकज्ञानवैशिष्ट्यावच्छिन्नत्व-स्वविशिष्टावच्छेदकताविशेष्यतानिरूपितप्रकारतावच्छिन्नत्वोभयसंबन्धेन। अवच्छेदकतायां प्रकारतावैशिष्ट्यं च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन। स्वं व्यावर्तकधर्मनिष्ठप्रकारता। न च वह्निमद्वृत्तिजलं जलवान् पर्वत इति ज्ञानस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया वह्निमद्वृत्तिजले एवं वह्निव्यापको धूमः धूमाभाववानिति ज्ञानकाले धूमाभाववद्यगोलके चातिव्याप्तिः तत्प्रतिबन्धकतायां निरुक्तप्रकारताविशिष्टान्यत्वादिति वाच्यम्। अगत्या तत्तत्प्रतिबन्धकताभेदस्य निवेश्यत्वादित्याहुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोच्यते यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वमित्यत्र प्रकृतानुमितिप्रतिबन्धकतातिरिक्तवृत्तिविषयिताकत्वेन यादृशविशिष्टं विशेषणीयम्, अतो यादृशविशिष्टपदेन बाधादेर्धर्तुमशक्यत्वान्नोक्ताव्याप्तिः। न चैवं महानसनिपतत्वाभाववदवृत्तिकालीनपर्वतो वह्निमान् धूमादित्यादौ महानसवह्न्यभाववदित्यादिज्ञानशून्यकाले महानसवृत्तिधूमे निर्जलह्रदीनपर्वतो वह्निमान् सस्नेहजलादित्यादौ ह्रदो वह्न्यभाववानित्यादिज्ञानशून्यकाले सस्नेहजलवद्ध्रदे एवमभावत्वावच्छेदेन वह्निमत्त्ववैशिष्ट्येन घटत्वावच्छेदेनाभाववदन्यत्ववैशिष्ट्येन प्रतियोगितासम्बन्धेन वह्नीयवदन्यत्ववैशिष्ट्येन च घटितपक्षतावच्छेदकवह्निमदन्याभावकालीनाभाववदन्यवह्नीयवदन्यघटकालीनपर्वतो वह्निमान् धूमादित्यादौ घटवृत्तिर्धूम इत्यादिज्ञानशून्यकाले आश्रयासिद्धित्रयघटितवह्न्यभाववद्घटात्मके चातिव्याप्तिः। तत्तद्विशिष्टविषयकज्ञानस्य ज्ञानद्वयकाले व्याप्त्यंशेऽनुमितिप्रतिबन्धकत्वेन विशिष्यदलस्य तत्तद्विशिष्टस्यानुमितिप्रतिबन्धकतातिरिक्तवृत्तिविषयिताकत्वाभावेन यादृशविशिष्टपदेन धर्तुमशक्यत्वेन सत्यन्तदलस्य च तत्र सत्त्वादिति। अत एव बाधादावुक्ताव्याप्तिवारणाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकविषयिताकत्वेन यादृशविशिष्टं विशेषणीयमित्यपि प्रत्युक्तम्। तथासत्युक्ताश्रयासिद्धिघटितविशिष्टानां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकविषयिताकत्वाभावेनोक्तातिव्याप्तेर्दुर्वारत्वादिति वाच्यम्। यादृशविशिष्टविषयितासामान्यं यत्प्रतिबन्धकतावच्छेदकं तत्प्रतिबन्धकतातिरिक्तवृत्तिविषयिताकत्वेन सत्यन्तदलघटकयादृशविशिष्टस्य विशेषणादेव सर्वसामञ्जस्यात्। बाधादौ साध्यवत्ताज्ञानप्रतिबन्धकतामादायैव लक्षणसमन्वयात् ज्ञानद्वयकालेऽनित्यदोषस्थले च व्याप्तिज्ञानप्रतिबन्धकतामादायैव लक्षणसमन्वयात्। न च ज्ञानद्वयशून्यकालेऽपि पक्षज्ञानप्रतिबन्धकतामादायासिद्धिघटितोक्तातिव्याप्तितादवस्थ्यमिति वाच्यम्। यत्प्रतिबन्धकतामादाय लक्षणं सङ्गमनीयं तत्प्रतिबन्धकत्वघटितस्यैव विशिष्टान्तराघटितस्य विवक्षणीयतया पक्षज्ञानप्रतिबन्धकताघटितविशिष्टान्तराघटितत्वविरहादेवोक्तातिव्याप्तिवारणसम्भवादिति ध्येयम् ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परे तु यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञान-वैशिष्ट्यानवच्छिन्नप्रतिबन्धकताविशिष्टान्यप्रतिबन्धकत्वं तादृशज्ञा-नसहिततादृशविशिष्टविषयकज्ञानाधिकरणत्वं विवक्षणीयम्। प्रतिब-न्धकतावैशिष्ट्यं च व्यापकतासम्बन्धेन। व्याप्यव्यापकभा-स्वावच्छेदकत्वसम्बन्धेन। तथाच बाधविषयकज्ञानी यज्ञानवैशिष्ट्य-वच्छिन्नव्याप्तिज्ञानप्रतिबन्धकताया ज्ञानवैशिष्ट्यानवच्छिन्नस-वत्ताज्ञानप्रतिबन्धकताविशिष्टत्वात् यादृशविशिष्टपदेन बाधादेर्ध-ज्ञापयत्वादेव नाव्याप्तिः। उक्ताश्रयासिद्धिघटितविशिष्टविषय-नीयव्याप्तिज्ञानप्रतिबन्धकतायाश्च पक्षज्ञानप्रतिबन्धकताविशिष्ट-भावादेवोक्तातिव्याप्तिः॥

अथवा यादृशविशिष्टविषयित्वाव्यापकीभूतविषयिताशून्य-शविशिष्टविषयकज्ञानसामान्ये ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्ध-त्वाभावः तादृशत्वेन सत्यन्तदलघटकयादृशविशिष्टं विशेषणीय-प्रतिबन्धकत्वाभावश्च स्वानवच्छेदकविषयिताशून्यत्वसम्बन्ध-च्छिन्नप्रतियोगिताको ग्राह्यः। तथाच बाधादिविषयकज्ञानसामा-तादृशप्रतिबन्धकत्वाभावविरहादेव बाधादेर्यादृशविशिष्टपदेन ध-र्तुमशक्यत्वान्नाव्याप्तिः। उक्ताश्रयासिद्धिघटितविशिष्टविषयकज्ञान-सामान्य एव च तादृशप्रतिबन्धकत्वाभावसत्त्वात् ज्ञानद्वयशून्य-काले नोक्तातिव्याप्तिः। अव्यापकीभूतविषयताशून्यत्वनिवेशात् ह्रदो वह्निमान् अभावादित्यादौ अभावद्वयविषयकज्ञानसामान्यान्तर्ग-तवह्न्यभाववान् ह्रद इत्याकारकज्ञाने तादृशप्रतिबन्धकत्वाभावा-सत्त्वेऽपि ह्रदवृत्तिवह्न्यभाव इत्यादिज्ञानशून्यकालेऽभाववद्ध्रदाद्या-त्मके तदानीं व्यभिचारात्मके नातिव्याप्तिः। न च तथापि जलाभाव-वज्जलकालीनह्रदो वह्निमान् जलादित्यादौ जलवज्जलं वह्न्यभाववत् जलवच्च जलवज्जलमिति ज्ञानद्वयशून्यकाले जलवज्जलेऽतिव्याप्तिः तादृशजलविषयकज्ञानसामान्ये निरुक्तप्रतिबन्धकत्वाभावविरहात् यादृशविशिष्टपदेन धर्तुमशक्यत्वादिति वाच्यम्। जलत्वावच्छिन्न-प्रकारतानिरूपितजलवज्जलत्वावच्छिन्नविशेष्यतावच्छेदकतायाः प-क्षज्ञानप्रतिबन्धकतानवच्छेदकत्वेन तादृशजलविषयकज्ञानसामा-न्येपि तादृशप्रतिबन्धकत्वाभावसत्त्वादित्याहुः॥

यादृशविशिष्टविषयितासामान्ये ज्ञानवैशिष्ट्यानवच्छिन्नप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धकताविशिष्टान्यत्वं तादृशत्वेन सत्यन्तदलघटकयादृशविशिष्टस्य विशेषणान्नोक्तदोषः। प्रतिबन्धकतावैशिष्ट्यं च स्वानवच्छेदकविषयिताशून्यवृत्तित्वसम्बन्धेनेत्यपि वदन्ति। अथ यादृशज्ञानान्तरविशिष्टत्वेनेत्यत्रान्तरपदं व्यर्थम् यादृशज्ञानविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वमित्युक्तावेव सामञ्जस्यमिति चेन्न। ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतालाभाय तदुपादानादिति॥

केचित्तु मिश्रमते प्रामाण्यनिश्चयविशिष्टग्राह्याभावनिश्चयत्वेनैव प्रतिबन्धकत्वम् न त्वप्रामाण्यज्ञानाभावविशिष्टग्राह्याभावनिश्चयत्वेन तथा चायोगोलकं धूमाभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानस्वधर्मिकप्रामाण्यनिश्चयविरहकाले साधारण्यस्य मिश्रैरप्यनङ्गीकारात्। अयोगोलकं धूमाभाववदिति निश्चयवैशिष्ट्ये सति स्वधर्मिकप्रामाण्यनिश्चयविशिष्टो योऽयोगोलकवृत्तिर्वह्निरिति निश्चयस्तदनधिकरणत्वघटितमेव लक्षणं करणीयमित्येतादृशार्थमेव तदुपादानादित्याहुः*॥

अथ नित्यदोषस्यापि एतल्लक्षणलक्ष्यत्वेन लक्षणघटकज्ञाने तत्तत्पुरुषीयत्वनिवेशस्यावश्यकतयाऽनन्तसंसारे कस्यापि पुरुषस्य सर्वदैव तादृशज्ञानसहिततादृशविशिष्टविषयकज्ञानसत्त्वेन तदनधिकरणमेवाप्रसिद्धमिति। न चैकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तादृशज्ञानविशिष्टान्यतादृशविशिष्टविषयकज्ञाननिरूपितविषयत्वाभाववत्त्वमेव सत्यन्तार्थो वाच्यः, अतो न तादृशक्षणाप्रसिद्धिनिबन्धनो दोष इति वाच्यम्। कस्यापि पुरुषस्य तादृशज्ञानविशिष्टान्यधूमाभाववदयोगोलकमित्याकारकज्ञानसत्त्वेन तन्निरूपितविषयत्वाभावविरहाद्धूमाभाववदयोगोलकादौ सर्वदैव लक्षणासत्त्वप्रसङ्गादिति चेन्न। यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य स्ववृत्तित्वोपलक्षितसमूहालम्बनानुमितित्वव्यापक-

---

*अवच्छेदकतावच्छेदकसाधारणावच्छेदकत्वस्वीकारमते धूमाभाववदयोगोलकमितिज्ञानस्यापि ज्ञानान्तरनिष्ठप्रतिबन्धकताया अवच्छेदकत्वेनेव स्वनिष्ठनिश्चयत्वस्यापि तत्प्रतिबन्धकतावच्छेदकत्वात् एकज्ञानकालेऽतिव्याप्तिरित्यन्तरपदमुपात्तमिति ध्येयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबध्यतानिरूपितप्रतिबन्धकत्वं स्वसमानाधिकरणतादृशज्ञानस-
हिततादृशविशिष्टविषयकज्ञानानधिकरणक्षणवृत्तित्वविशिष्टताद-
शविशिष्टपर्याप्तविषयताविरहवत्त्वे सति यादृशविषयितासामान्यं
स्ववृत्तितादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताव
च्छेदकं तादृशत्वमित्यर्थकरणादेव सर्वसामञ्जस्यात्, सर्वत्र स्वप-
देन ज्ञानद्वयसमानाधिकरणयत्किञ्चिदनुमितिमादाय लक्षणस
न्वयः कर्तव्य इति ध्येयम् ॥ १ ॥

यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशयसाधारणं
ध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमिति शिरोमणिः ।

अथ किमिदं साध्याभावांशे निश्चयत्वमित्याशंक्य वस्तुतस्
ज्ञानभेदेन विषयताभेदाभ्युपगमे निश्चयीयविषयतायां संशयत्व
रूपकविषयताभेदो न दुर्घटः तन्मते आधेयत्वविषयतानिरूपकधर्मि
विषयतायां ज्ञानविशिष्टान्यत्वं निवेश्यम् । वैशिष्ट्यं च स्वनिरूपित
त्व-स्वीयसाध्यप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वोभ
यसम्बन्धेन । विषयताभेदानभ्युपगमे च साध्याभावप्रकारतानिरू
पिता या हेतुविषयतानिरूपिताधेयताप्रकारतानिरूपिताधिकरणावि
षयता तद्विशिष्टत्वमेव निश्चयत्वम् । वैशिष्ट्यञ्च स्वनिरूपकत्व-स्व-
निष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन । भेदप्रतियोगितावच्छेद-
कत्वं च स्वावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारता-
कत्वसम्बन्धावच्छिन्नं, साध्यप्रकारताविशिष्टान्यतादृशविशेष्यता-
शालित्वं वा । वैशिष्ट्यञ्च स्वनिरूपकज्ञानानिरूपितत्व-स्वनिरूपित-
विशेष्यतावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन । संशयनिश्चयविषय-
तयोरभेदेऽपि सामानाधिकरण्यस्याव्याप्यवृत्तितया निश्चयवृत्तिता-
वच्छेदेन भेदसत्त्वादिति भट्टाचार्येणोक्तम् ।

संशयेऽपि प्रत्येककोटिप्रकारतानिरूपितविशेष्यताद्वयस्यैव स्वी-
कारात् धूमतदभाववदयोगोलकवृत्तिर्वह्निरित्याकारकसाध्याभावां-
शे संशयत्वाभावात् संशयस्यापि संग्रहः स्यादतः प्रथमतृतीयकल्पे
सम्बन्धघटकतया साध्यप्रकारतानिरूपितत्वमनिवेश्य साध्यप्रकार-
तानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वपर्यन्तनिवेशः । एवमुक्त-
दोषवारणायैव द्वितीयकल्पेऽपि भेदप्रतियोगितावच्छेदकतानियाम-
कसम्बन्धे स्वनिरूपितसाध्यप्रकारताकत्वमनिवेश्य स्वावच्छेदका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारताकत्वनिवेशः । अत्र प्रथमे प्रथमसम्बन्धमात्रनिवेशे स्वपदेन निश्चयमादाय द्वितीयसम्बन्धमात्रनिवेशे च स्वपदेन साध्यसंशयमादाय ज्ञानविशिष्टान्यतादृशविषयताप्रसिद्धिः स्यादत उभयसम्बन्धनिवेशः । एवं द्वितीयेऽपि प्रथमसम्बन्धमात्रनिवेशे स्वपदेन संशयाकारज्ञानीयतादृशविषयतामादाय द्वितीयसम्बन्धमात्रनिवेशे च धूमाभाववत्पर्वतवृत्तिर्वह्निरिति ज्ञानीयतादृशविषयतामादाय धूमतदभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानाकारकसंशयस्यापि निश्चयत्वापत्तिरत उभयसम्बन्धमात्रनिवेशः । एवं तृतीयेऽपि प्रथमसम्बन्धमात्रनिवेशे च स्वपदेन महानसं धूमवत् धूमाभाववदयोगोलकवृत्तिर्वह्निरितिज्ञानीयधूमप्रकारतामादाय तज्ज्ञानासंग्रहापत्तेः । द्वितीयसम्बन्धमात्रनिवेशे च स्वपदेन संशयाकारज्ञानीयसाध्यप्रकारतामादाय साध्याभावांशे सधर्मितावच्छेदककनिश्चयस्यासंग्रहापत्तेरत उभयसम्बन्धनिवेशः ॥ अत्र कल्पत्रय एव साध्यप्रकारतापदेन साध्याभावीयप्रतियोगितावच्छेदकावच्छिन्नप्रकारत्वं वाच्यम्, तेन साध्याभावसाध्याभावाभावकोटिकसंशयाकारकज्ञानस्य न संग्रहः ।

अत्र द्वितीयकल्पे साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञानासंग्रहः स्यात् तज्ज्ञाने तज्ज्ञानीयतादृशाधिकरणविषयतानिरूपकत्वसत्त्वेऽपि तादृशाधिकरणविषयतानिष्ठवच्छेदकताकभेदवत्त्वाभावेन तादृशाधिकरणविषयताया अवच्छेदकाभावेन स्वावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारताकत्वस्य तादृशविषयताप्रतियोगिकसंसर्गत्वाभावादतो द्वितीयकल्पानुसरणम् । यदि च निरुक्तप्रकारताकत्वसम्बन्धावच्छिन्नस्वाभाववत्त्वघटितोभयसम्बन्धेन तादृशविषयतावैशिष्ट्यं विवक्ष्यते, तदा तत्कल्पोऽपि साधीयानिति ध्येयम् ॥

अत्र कल्पत्रय एव अयोगोलकत्वसामानाधिकरण्येन साध्यकोटिकसंशयात्मकस्यायोगोलकत्वसामानाधिकरण्येन साध्याभावावगाह्ययोगोलकं धूमधूमाभाववत् धूमाभाववदयोगोलकवृत्तिर्वह्निरित्याकारकनिश्चयस्यासंग्रहापत्तिः । प्रथमे तज्ज्ञानीयाधिकरणविषयतायां ज्ञानविशिष्टान्यत्वस्य, तृतीये साध्यप्रकारताविशिष्टान्यत्वस्य, द्वितीये चोक्तनिश्चये तादृशाधिकरणविषयतावत्त्वस्याभावादिति । यदि च प्रथमतृतीयकल्पे निरुक्तोभयसम्बन्ध एवं साध्यप्रकारत्वावच्छिन्नप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्व-एतत्त्रितयसम्बन्धेन वै-
शिष्ट्यम्, द्वितीये च भेदप्रतियोगितावच्छेदकतानियामकस्वावच्छे-
दकावच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारताकत्वसंसर्गघटकीभूत-
साध्यप्रकारतायां स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छे-
दकत्वं निवेश्य तत्संग्रहः क्रियते। तदा प्रथमतृतीयकल्पे साध्यप्र-
कारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वस्य द्वितीये च साध्य-
प्रकारतायां स्वावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वस्य वैयर्थ्या-
त्तिरिति ध्येयम ॥ २ ॥

यद्वा साध्यतद्वतोरत्यन्तान्योन्याभावौ साध्याभावव्याप्यादिव्य-
वृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमय्य तत्र हेतुसामानाधिक-
ण्याभावग्रहविरोधित्वं साधारण्यमिति शिरोमणिः ॥

साध्याभावव्याप्यादिव्यावृत्तसाध्यवत्ताज्ञानविरोधित्वं च तद्व-
त्तानिश्चयप्रतिबध्यतावच्छेदिका सती तद्वत्ताज्ञानप्रतिबन्धकताव-
च्छेदिका या प्रकारता तदाश्रयत्वम्। तदभावव्याप्यवत्ताज्ञानस्य
तद्वत्तानिश्चयाप्रतिबध्यतया तद्विषयव्युदास इति भट्टाचार्येणोक्तम्।

अथैवमपि धूमाभावव्याप्याभाववद्धूमवत्कालीनपर्वतो धूमवा-
न्वह्नेरित्यादौ धूमाभावव्याप्यनिष्ठहेतुसामानाधिकरण्यवारणमश-
क्यमेव धूमाभावव्याप्यवत्ताबुद्धिम्प्रति धूमवत्तानिश्चयस्याप्रतिब-
न्धकत्वेऽपि धूमवत्तावच्छेदेन धूमाभावव्याप्याभाववत्तानिश्चयवि-
शिष्टधूमवत्तानिश्चयत्वेन प्रतिबन्धकत्वस्यावश्यकतया उक्तस्थली-
यसाध्यवत्तानिश्चये तत्प्रतिबन्धकतायामनपायादिति। विशिष्टसा-
ध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिवेशे च उक्तस्थले धूमा-
भावसामानाधिकरण्याद्यसङ्ग्रहः। धूमाभाववत्ताज्ञानप्रतिबन्धक-
तावच्छेदककोटौ विशिष्टधूमत्वविषयत्वानिवेशात्। न च साध्य-
वत्तानिश्चयत्वव्यापकज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानिरूपित-
प्रतिबध्यतावच्छेदिका सती साध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यता-
निरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबध्यतावच्छेदिका या प्रकारता
तदाश्रयत्वं विवक्षणीयमतो नोक्तदोषः। द्वितीयप्रतिबन्धकतायां
ज्ञानविशिष्टत्वानवच्छिन्नत्वनिवेशात् धूमव्याप्यसाध्यकस्थले धूम-
व्याप्याभाववद्धूमाभाववत्कालीनधूमाभावनिष्ठहेतुसामानाधिक-
रण्ये नातिव्याप्तिरिति वाच्यम्। एवमपि धूमाभावव्याप्याभावव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यधूमवान् वह्नेरित्यादौ धूमाभावव्याप्यसामानाधिकरण्ये धूमव्याप्यवान् वह्नेरित्यादौ धूमव्याप्याभावव्याप्यधूमाभावसामानाधिकरण्ये चातिव्याप्तेर्दुर्वारत्वात् तद्व्याप्यवत्ताज्ञाने तद्व्याप्याभावव्याप्यदभावववत्ताज्ञाननिरूपितप्रतिबध्यत्वप्रतिबन्धकत्वयोरुभयोरेव सत्त्वादिति चेत् ।

अत्रोच्यते—साध्यवत्ताज्ञाननिष्ठैकरूपावच्छिन्नप्रतिबन्धकत्वप्रतिबन्धनिवेशादेव धूमाभावव्याप्याभावव्याप्यधूमसाध्यकस्थले साध्यज्ञाननिरूपितयोरेकरूपावच्छिन्नप्रतिबध्यत्वप्रतिबन्धकत्वयोरवच्छेदकप्रकारताश्रयत्वनिवेशादेव च धूमव्याप्यसाध्यकस्थलेऽतिव्याप्तिवारणसम्भवात् तद्व्याप्यवत्ताज्ञाने तद्व्याप्याभावव्याप्यतद्व्याप्यवत्ताज्ञाननिरूपितप्रतिबध्यत्वप्रतिबन्धकत्वयोः सत्त्वेऽपि तयोरेकरूपावच्छिन्नत्वाभावात् तदभाववत्ताज्ञानत्वमात्रस्य प्रतिबध्यतावच्छेदकत्वाद्व्याप्याभावव्याप्यवत्ताज्ञानत्वमात्रस्य च प्रतिबन्धकतायामवच्छेदकत्वादिति ध्येयम् ॥

एकरूपावच्छिन्नतादृशप्रतिबध्यताप्रतिबन्धकतावच्छेदकत्वप्रकारकत्वञ्च साध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यताविशिष्टप्रकारकत्वम् । वैशिष्ट्यञ्च स्वनिरूपितप्रतिबन्धकतावच्छेदकत्व–स्वविशिष्टप्रतिबध्यतावच्छेदकत्वोभयसम्बन्धेन । स्ववैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नप्रतिबन्धकतानिरूपितत्व–स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेनेति नव्याः ॥ ३ ॥

अथ घटाभावादेरपि वह्न्यभावत्वादिना ज्ञानस्य वह्निमत्ताज्ञानविरोधित्वात् घटाभावादिसामानाधिकरण्यमपि वह्न्यादिसाध्यके व्यभिचारः स्यात् । साध्यवत्ताज्ञानविरोधितावच्छेदकीभूतविषयतानिरूपितहेतुसामानाधिकरण्याभावविषयताशालिग्रहविरोधितानिवेशे चासम्भवः । धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारताया एव साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकतया साध्याभावो न हेतुसमानाधिकरण इति ज्ञानीयसाध्याभावविषयताया अतथात्वादिति भट्टाचार्येणोक्तम् ।

अत्रेयमाशङ्का—अथ सर्वत्रैव साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयतानिरूपितहेत्वसामानाधिकरण्यविषयताशालिहेत्वसमानाधिकरणसाध्याभाववान्पक्ष इति स्वरूपग्रहविरोधितामादायैव व्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDF

भिचारे लक्षणसमन्वयात् कथमसम्भव इति चेत् ।

अत्राहुः–उक्तज्ञानीयपक्षविशेष्यतानिरूपितसाध्याभावप्रकारता-
या एव साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकतया तादृशप्रकारता-
निरूपितत्वस्य उक्तज्ञानीयहेत्वसामानाधिकरण्यविषयतायामस-
न उक्तज्ञानमादायापि लक्षणसमन्वयो दुरुपपाद इति । साध्या-
वविशेष्यताया एव उक्तज्ञानीयहेत्वसामानाधिकरण्यविषयतानि-
कत्वात्, स्वमते समानाधिकरणप्रकारताविशेष्यतयोर्भेदात् ।

वस्तुतस्तु समानाधिकरणप्रकारताविशेष्यतयोरैक्येऽपि स-
वत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयतानिरूपितहेत्वसामानाधि-
ण्यविषयताशाली यो वह्न्यसमानाधिकरणघटाभावधूमाभाववा-
त्याकारकघटाभावधर्मिकहेत्वसामानाधिकरण्यावगाहिघटाभाव-
ह्न्यसामानाधिकरण्यधूमाभावत्वैतत्त्रितयधर्मावच्छिन्नप्रकारताशा-
ग्रहस्तद्विरोधिनि वह्निसमानाधिकरणघटाभावे, एवं वह्निमान्धूमा-
त्यादौ सद्धेतौ साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयतानि-
पितहेत्वसामानाधिकरण्यविषयताशालिधूमासमानाधिकरणवह्न्य-
ववान् पर्वत इत्याकारकग्रहविरोधिधूमासमानाधिकरणवह्न्यभाव-
भाववत्पर्वतादौ चातिव्याप्तिरतस्तद्वारणाय साध्यवत्ताज्ञानप्रतिब-
न्धकतावच्छेदकविषयतानिरूपितहेत्वसामानाधिकरण्यविषयताया-
मवच्छेदकतानात्मकत्वमवश्यं निवेशनीयम् । एवञ्चोक्तज्ञानमादाय
लक्षणसमन्वयो दुर्घट इति । एतेन–प्रकारताविशेष्यतयोर्भेदेऽपि
साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नविषयतानि-
रूपितहेत्वसामानाधिकरणविषयताशालिग्रहविरोधितानिवेशेनैवास-
म्भववारणं संभवतीति–इत्यपि प्रत्युक्तम् । प्रकारताविशेष्यतयोर्भेदे-
ऽपि उक्तातिव्याप्तिवारकप्रकारस्यानुसरणीयतयाऽसंभववारणस्या-
सम्भवादिति ।

न च साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकमुख्यविशेष्यता-
निरूपितहेत्वसामानाधिकरण्यविषयताशालिग्रहाविरोधितानिवेशे उ-
क्तप्रकाराविवक्षणेऽप्युक्तातिव्याप्तिवारणं सम्भवति सर्वत्र व्यभि-
चारे च हेत्वसमानाधिकरणः साध्याभावः पक्षवृत्तिरित्याकारक-
ज्ञानमादायैव लक्षणं सङ्गमनीयमिति वाच्यम् । तथासति हेत्वसमा-
नाधिकरणघटाभावः साध्याभाववानित्याकारकज्ञानविरोधितामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दायैव हेतुसमानाधिकरणघटाभावादावतिव्याप्तिवापत्तेः ।

यद्यप्येवमपि एकत्र द्वयमिति रीत्या साध्याभावधर्मिकपक्षवृत्ति-
हेत्वसामानाधिकरण्योभयावगाहिज्ञानस्य साध्यवत्ताज्ञानविरोधि-
च्छेदकीभूतसाध्याभावविषयितानिरूपितावच्छेदकतानात्मकहे-
सामानाधिकरण्यविषयतामादायैव सर्वत्र लक्षणसमन्वयसम्भवः;
पि एकत्र द्वयमिति रीत्या घटाभावधर्मिकसाध्याभावहेत्व-
नाधिकरण्योभयावगाहिज्ञानीयसाध्यवत्ताज्ञानप्रतिबन्धकता-
कघटाभावविषयतानिरूपितहेत्वसामानाधिकरण्यविषयता-
ये घटाभावनिष्ठवह्निसामानाधिकरण्ये धूमधर्मिकधूमाभाववह्नय-
नाधिकरण्योभयावगाहिज्ञानीयसाध्यवत्ताज्ञानप्रतिबन्धकताव-
कधूमविषयतानिरूपितहेत्वसामानाधिकरण्यविषयतामादाय व-
सामानाधिकरण्यवद्धूमे चातिव्याप्तिवारणाय साध्यवत्ताज्ञानप्र-
न्धकतावच्छेदकविषयतापदेन प्रकारताया विवक्षितत्वादसम्भ-
सङ्गतिः ।

अथैवमपि गुणत्वसामानाधिकरण्यसाध्यकगुणत्वहेतुकस्थले गु-
त्वसामानाधिकरण्याभावो न गुणत्वसमानाधिकरण इति ज्ञानी-
यसाध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतगुणत्वसामानाधिकर-
ण्याभावप्रकारतानिरूपितगुणत्वसामानाधिकरण्याभावविषयत्वाव-
च्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदके गुणत्वसामाना-
धिकरण्यबहुणत्वसामानाधिकरण्याभावे लक्षणगमनादसम्भवदाना-
सङ्गतिरिति चेन्न ।

धूमाभाववान् वह्नेरित्यादौ साध्यवत्ताज्ञानविरोधितावच्छेदकी-
भूतधूमाभावाभावत्वावच्छिन्नप्रकारतानिरूपितवह्निसामानाधिकर-
ण्याभावत्वावच्छिन्नविषयिताशालिवह्निसामानाधिकरण्याभावो धू-
माभावाभाववान् इत्याकारकज्ञानविरोधिधूमाभाववद्वह्निसामानाधि-
करण्याभावेऽतिव्याप्तिवारणाय साध्यवत्ताज्ञानविरोधितावच्छेदकप्र-
कारतानिरूपितहेत्वसामानाधिकरण्यविषयतायां साध्यवत्ताज्ञानप्र-
तिबन्धकतानवच्छेदकत्वस्यापि निवेशनीयतयोक्तस्थले लक्षणगम-
नासम्भवादिति दिक् ।

यत्तु एकत्र द्वयमिति रीत्या ज्ञानमादाय प्रागुक्तातिव्याप्तिवार-
णाय साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयतायां हेत्वसामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाधिकरण्यप्रकारत्वान्यप्रकारत्वानिरूपितत्वं निवेशनीयम्, धूमाभा-
ववान् वह्नेरित्यत्र प्रागुक्तातिव्याप्तिस्तु हेत्वसामानाधिकरण्यविषय-
तापदेन प्रकारताविवक्षयैव वारणीयेति ।

तत्तुच्छम्–तथासति तादृशगुणत्वसामानाधिकरण्यसाध्यकस्थ-
ले साध्यवत्ताज्ञानविरोधितावच्छेदकविषयतानिरूपितहेत्वसामान्य-
करण्यप्रकारताशालिरूपत्वं गुणत्वसामानाधिकरण्याभाववदित्या-
रकज्ञानविरोधिगुणत्वसामानाधिकरण्यवद्रूपत्वेऽतिव्याप्तितादव-
स्थ्यादिति ध्येयम् ॥

केचित्तु प्रकारताविशेष्यतयोर्नानात्वमत एवायं ग्रन्थः, त-
प्रागुक्तातिव्याप्तीनां वारणाय साध्यवत्ताज्ञानप्रतिबन्धकतावच्छे-
विषयतानिरूपितहेत्वसामानाधिकरण्यविषयतापदेन साध्यवत्ता-
नप्रतिबन्धकतावच्छेदकप्रकारतानिरूपितहेत्वसामानाधिकरण्यप्र-
रताया विवक्षणीयतया प्रकारतानिरूपितप्रकारत्वाप्रसिद्धैव-
भवसङ्गतिरित्याहुः । तच्चिन्त्यम् ॥ ४ ॥

अथ घटाभावादेरित्यादिना फक्किकामवतार्य इति चेन्न फलीभू-
ज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रक-
रताशालिनिश्चयत्वेन साध्यवत्ताज्ञानप्रतिबन्धकता तद्रूपावच्छिन्नांशे-
तुसामानाधिकरण्याभावग्रहविरोधितानिवेशेनातिप्रसङ्गाभावात् सा-
ध्याभावत्वादेरेव तादृशत्वादित्यनेन सिद्धान्तितं भट्टाचार्येण ।

अथात्र घटाभावत्वधूमाभावत्वोभयावच्छिन्नघटाभावात्मकधूमा-
भाववानिति ज्ञानीयप्रकारतायास्तादृशत्वेन तदुभयावच्छिन्नविशे-
ष्यकधूमासामानाधिकरण्यग्रहप्रतिबन्धकतावच्छेदकविषयिताके धू-
मसमानाधिकरणघटाभावेऽतिव्याप्तिर्दुर्वारैव । न च साध्यवत्ताज्ञा-
नप्रतिबन्धकतानवच्छेदकविषयिताशून्यज्ञानीयत्वस्य यद्रूपावच्छिन्न-
प्रकारतायां विशेषणादेव नोक्तातिव्याप्तिः घटाभावत्वावच्छिन्नविष-
यितायास्तादृशप्रतिबन्धकतानवच्छेदकतया तच्छून्यत्वाभावादिति
वाच्यम् । तथासत्यसम्भवापत्तेः–सर्वत्रैव निरवच्छिन्नविशेष्यतायाः
सामानाधिकरण्यसम्बन्धावच्छिन्नपारतन्त्रीयविषयतायाश्च तादृश-
त्वात्तच्छून्यत्वाभावादिति चेन्न ।

यत्किञ्चित्प्रतिबन्धकतावच्छेदकत्वस्य तादृशप्रतिबन्धकतानव-
च्छेदकविषयतायां विवक्षणान्नोक्तदोष इत्याहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तुतस्तु स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयतावच्छेदकं यद्रूपावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारत्वं तद्रूपावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वेन यद्रूपं विशेषणीयम्, तथाच धूमाभावादेर्निरुक्ताविशेषणाक्रान्तत्वेन तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य निरुक्तोभयधर्मेऽसत्त्वेन तमादायातिव्याप्त्यनवकाशात् इति ध्येयम् ॥

साध्यवत्ताज्ञानधर्मितावच्छेदका ये ये धर्मा इत्यस्यानुगमः—साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वव्यापकत्वं प्रकारत्वं तदवच्छेदकावच्छिन्नविशेष्यतानिरूपितहेत्वसामानाधिकरण्यप्रकारताशालग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयताकरूपवत्त्वं तत्त्वम् । प्रकारतायां तादृशावच्छेदकत्वव्यापकत्वं च स्वविशिष्टविशेष्यतावच्छेदकत्वसम्बन्धेन । स्वं—प्रकारता । विशेष्यतायां स्ववैशिष्ट्यं च स्वावच्छेदकावच्छिन्नप्रकारत्वावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यताविशिष्टप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्त्वसम्बन्धेन । स्वं—प्रकारता । विशेष्यतायां प्रतिबन्धकतावत्त्वं च स्वावच्छेदकत्व—स्वविशिष्टप्रतिबध्यतावच्छेदकत्वोभयसम्बन्धेन । स्वं—प्रतिबन्धकता । प्रतिबध्यतायां स्ववैशिष्ट्यं च स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्व—स्वनिरूपिततादृशप्रतिबध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतिबन्धकतानिरूपितत्वोभयसम्बन्धेन । स्वं—प्रतिबन्धकता । रूपवत्त्वं च उभयत्रैव स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन । प्रतिबध्यतायां विशेष्यतावैशिष्ट्यं च व्यापकत्वसम्बन्धेन । स्वं—विशेष्यता । साध्यतावच्छेदकसमनियतानुयोगितानिरूपितप्रतियोगितावच्छेदकावच्छिन्नविधेयतानिरूपितउद्देश्यतावच्छेदकत्वेन साध्यवत्ताज्ञानधर्मितावच्छेदकं विशेषणीयम्, नातः साध्यादेरपि तदवच्छेदकत्वाद्व्यापकत्वहानिरिति ध्येयम् । व्यावृत्तिः स्वयमूह्या ॥ ५ ॥

साध्यवत्ताज्ञानविरोधितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नविषयतानिरूपितहेत्वसामानाधिकरण्यविषयतायां धर्मितावच्छेदकता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्नत्वमुपलक्षणविधया निवेश्यम्, धूमासमानाधिकरणवह्न्यभावो न घटसमानाधिकरण इति ज्ञानविरोधिनि धूमासमानाधिकरणवह्न्यभावादौ घटादिसामानाधिकरण्ये नातिप्रसङ्ग इति भट्टाचार्येणोक्तम् ॥

अथ धर्मितावच्छेदकभिन्नत्वेन हेत्वसामानाधिकरण्यविषयता या विशेषणीयत्वेऽपि साध्यवत्ताज्ञानविरोधितावच्छेदकधर्मावच्छिन्नविषयतानिरूपितताद्दशहेत्वसामानाधिकरण्यविषयताशाली धूमासमानाधिकरणवह्न्यभाववान् पर्वत इत्याकारकग्रहः,तथा पर्वतद्वयमिति रीत्या वह्न्यभावधर्मिकधूमासामानाधिकरण्यजलासामानाधिकरण्य-उभयावगाहिग्रहश्च तद्विरोधिनि धूमासमानाधिकरणवह्न्यभावाभाववत्पर्वते धूमासामानाधिकरण्यजलासामानाधिकरण्योभयाभाववद्वह्न्यभावे चातिव्याप्तिरिति चेन्न ।

हेत्वसामानाधिकरण्यप्रकारत्वान्यप्रकारत्वानिरूपितसाध्यवत्ताज्ञानविरोधितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नमुख्यविशेष्यतानिरूपितहेत्वसामानाधिकरण्यविषयतानिवेशेनैवोक्तातिव्याप्तिवारणसम्भवादिति ध्येयम् ॥

न चैवं हेत्वसामानाधिकरण्यविषयतायामुक्तविशेषणान्यनिवेश्य साध्यवत्ताज्ञानविरोधितावच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकहेत्वसामानाधिकरण्यग्रहत्वव्यापकप्रतिबध्यतां निवेश्योक्तातिव्याप्तिवारणमेवोचितं लाघवादिति वाच्यम् । तथासति धूमवान् धूमाभावव्याप्यासमानाधिकरणवह्नेरित्यादौ धूमाभावव्याप्यसमानाधिकरणवह्न्यात्मकसाधनाप्रसिद्धावतिव्याप्त्यापत्तेः । तद्वारणाय साधनग्रहाविरोधित्वनिवेशे लाघवानवकाशात् । एतच्च-अत एव साधनाप्रसिद्धावपि नातिप्रसङ्ग इति-स्वयमेवोक्तमिति ध्येयम् ॥ ६ ॥

साध्याभावव्याप्यसाध्याभावावच्छेदकादिसामानाधिकरण्यवारणाय दर्शितप्रकारापेक्षया लघुप्रकारान्तरमाह-साध्यवत्ताज्ञानविरोधिनि हेत्वसामानाधिकरण्यग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वेति । अत्र हेत्वाभासत्वं प्रकृतानुमितिजनकज्ञानविरोधित्वम् । अनुमितिजनकज्ञानस्यापि अनुमितिजनकतावच्छेदककोटिप्रविष्टविषयत्वावच्छिन्नत्वेन निवेशः, न तु विशिष्टपक्षे व्याप्तिविशिष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैशिष्ट्यावगाहित्वेन, तथासति अन्योन्याभावघटितनानाविधव्या-
प्तीनामननुगमेन तादृशनानाविधव्यभिचारासंग्रहात् । तावद्व्याप्त्य-
वगाहिसमूहालंबनानुमितिनिवेशेन तत्सङ्ग्रहसम्भवेऽपि पक्षधर्म-
ावगाहितायाः प्रयोजनविरहेणानिवेशप्रसङ्गेन तादृशाभावग्रहवि-
ाधितविशेषणवैयर्थ्याच्चेति भट्टाचार्येणोक्तम् ॥

अथ व्याप्तिग्रहविरोधित्वरूपहेत्वाभासत्वनिवेशेऽपि काञ्चनमय-
ावान् काञ्चनमयवह्निरित्यादौ साध्यसाधनाप्रसिद्धिवारणायैव ता-
ाभावग्रहविरोधितानिवेशसार्थक्यसम्भवेन कथं तद्वैयर्थ्यमुक्त-
त । न च साध्यसाधनग्रहाविरोधित्वनिवेशनापि तद्वारणसम्भव
ति वाच्यम् । तथासति भवन्मतेऽपि हेतुमत्ताग्रहविरोधित्वनि-
ेशेनैव पक्षधर्मताज्ञानविरोधिस्वरूपासिद्धिवारणसम्भवेन तद्वै-
र्थ्यस्य दुर्वारत्वादिति । न चास्मन्मते ह्रदो धूमवान् वह्नेरित्यादौ
ामव्याप्याभाववद्धृदादावतिव्याप्तिवारणायैव तत्सार्थक्यमिति वा-
च्यम् । अनुमितिजनकतावच्छेदकीभूतमुख्यविशेष्यत्वानवच्छिन्न-
प्रतिबध्यतानिवेशेनापि तद्वारणसम्भवात् । न च विरोधिवारणायैव
तदिति वाच्यम् । साध्यसामानाधिकरण्यग्रहाविरोधत्वनिवेशेनापि
तद्वारणसम्भवात । न चाव्यभिचारितसाध्यसामानाधिकरण्याभाव-
वद्धेतावतिव्याप्तिवारणायैव तत्सार्थक्यमिति वाच्यम् । तस्याप्युक्त-
निवेशेनैव वारणसंभवादिति चेत् ।

अत्राहुः—तादृशाभावग्रहविरोधित्वदलनिवेशेऽपि साध्यग्रहावि-
रोधित्वं निवेशनीयम्, अन्यथा वह्न्यसमानाधिकरणधूमाभावव्या-
प्यकालीनधूमवान् वह्निरित्यादौ वह्निसमानाधिकरणधूमाभावव्याप्या-
द्यात्मकसाध्याप्रसिद्धावतिव्याप्तेर्दुर्वारत्वादिति । एवं च साध्याप्रसि-
द्धिवारणाय न तत्सार्थक्यम् । साधनाप्रसिद्धिस्तु तादृशाभावग्रह-
विरोधितापेक्षया लघुरूपसाधनग्रहाविरोधित्वविशेषणेनैव वारणी-
येत्यभिप्रायेण तद्वैयर्थ्याभिधानमिति ध्येयम् ॥

वस्तुतस्तु किञ्चिद्धर्मिकहेत्वसामानाधिकरण्यग्रहविरोधित्वनि-
वेशेनैव साधनाप्रसिद्ध्यादेर्वारणसम्भवात् साध्यवत्त्वज्ञानविरोधि-
धर्मिकतादृशाभावग्रहविरोधित्वपर्यन्तनिवेशो व्यर्थ इत्यत्रैव ता-
त्पर्यम् । अत एव वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वाभाववदवृत्तित्व-
रूपव्याप्तिज्ञानविरोधिनि अभावाप्रतियोगित्वरूपानुपसंहारिणि ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गनसाध्यके तादात्म्येन हेतौ गगनाभाववत्तादात्म्यरूपव्याप्तिज्ञान-
विरोधिनि अभावाप्रतियोगितादात्म्यरूपव्याप्यत्वासिद्धौ धूमवान्व-
ह्नेरित्यादौ धूमाभाववदवृत्तित्वव्यापकतद्वह्निभेदाभाववद्ह्रदौ चाति-
व्याप्तिवारणायैव तत्सार्थक्यसम्भवेन वैयर्थ्याभिधानमसङ्गतमित्य-
पि परास्तम्। न चैवं धूमाभाववदवृत्तित्वव्यापकवह्निसमानाधिकरण-
तद्वह्निभेदाभाववद्ह्रदादावतिव्याप्तिवारणायैव तत्सार्थक्यम् उक्त-
विशिष्टस्य किञ्चिद्धर्मिकहेत्वसामानाधिकरण्यग्रहं प्रत्यपि विरोधि-
त्वादिति वाच्यम्। किञ्चिद्धर्मिकहेत्वसामानाधिकरण्यग्रहत्व-
च्छिन्ननिरूपितयद्रूपावच्छिन्नप्रतिबन्धकत्वं व्याप्तिग्रहत्वावच्छिन्न-
रूपितं तद्रूपावच्छिन्नप्रतिबन्धकतानिवेशेनैवोक्तातिव्याप्तिवारण-
म्भवात्। वाच्यत्वत्ववान् वाच्यत्वादित्यादौ वाच्यत्वत्वाभाववद्-
वृत्तित्वव्यापकवाच्यत्वसमानाधिकरणवाच्यत्वाभावाभाववद्वाच्य-
त्वादावतिव्याप्तिवारणाय सत्यन्तदलनिवेशेऽपि सत्यन्तविशेष्यद-
लघटकप्रतिबन्धकत्वयोरेकरूपावच्छिन्नत्वनिवेशस्य भवतोऽप्याव-
श्यकत्वात्॥

अथैवमप्यनुमितिजनकज्ञानविरोधित्वरूपहेत्वाभासत्वनिवेशे-
ऽपि किञ्चिद्धर्मिकहेत्वसामानाधिकरण्यग्रहविरोधित्वविवक्षणेनैव
स्वरूपासिद्ध्यादेर्वारणसम्भवात्तवापि तद्वैयर्थ्यं दुर्वारमेव, काञ्चनम-
यह्रदो वह्निमान् ह्रदत्वादित्यादौ ह्रदत्वसमानाधिकरणकाञ्चनमयत्वा-
भावादेरपि ग्रंथकारोक्तपक्षग्रहाविरोधित्वदलेनैव वारणसम्भवा-
दिति चेन्न।

ह्रदो वह्निमान् ह्रदत्वादित्यादौ वह्निव्याप्याभावधर्मिकहेत्वसा-
मानाधिकरण्यग्रहविरोधिनि ह्रदत्वसमानाधिकरणवह्निव्याप्याभा-
वादावतिव्याप्तिवारणायैव स्वमते तत्सार्थक्यसम्भवादिति ध्येयम्॥

अथ पूर्वकल्पापेक्षया लाघवानुसन्धानेनैवैतत्कल्पस्यानुसरणं
भट्टाचार्येण कृतं, तन्न सङ्गच्छते-पूर्वकल्पे साध्याभावव्याप्यादिसामा-
नाधिकरण्यवारकस्य साध्यवत्ताज्ञानप्रतिबध्यतावच्छेदकत्वदलस्य
प्रकृतानुमितिजनकतावच्छेदकावेषयित्वावच्छिन्नप्रतिबध्यतानिरूपि-
तप्रतिबन्धकतावच्छेदकत्वरूपहेत्वाभासतावच्छेदकत्वविशेषणापे-
क्षयैव लघुत्वादिति चेत्।

अत्राहुः-पूर्वकल्पे काञ्चनमयधूमवान्वह्नेरित्यादौ साध्यवत्ताज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नविरोधिकाञ्चनमयत्वाभावादौ हेतुसामानाधिकरण्यवारणाय सा-
ध्यवत्ताज्ञानधर्मितावच्छेदका ये ये धर्मास्तत्तद्धर्मावच्छिन्नविशेष्य-
कसाध्यवत्ताविरोधित्वस्य निवेशिततया तदपेक्षया एतत्कल्पस्य
घुत्वमेव । एतत्कल्पे काञ्चनमयत्वाभावसामानाधिकरण्यादे-
त्वाभासतावच्छेदकत्वदलेनैव वारणात् । न च ह्रदो वह्निमान्
त्वादित्यत्र वह्निव्याप्याभावादेरपि समूहालम्बनसाध्यवत्ताज्ञान-
ताधित्वात्तन्निष्ठहेत्वसामानाधिकरण्यग्रहवारणायाऽत्रापि पूर्वोक्त-
धित्वमेव विवक्षणीयमिति क लाघवमिति वाच्यम् । एतत्क-
पि किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यवत्ताग्रहत्वव्यापकप्रतिब-
कतानिवेशेनैव वह्निव्याप्यादेर्वारणसम्भवादिति ॥

अथैवं पूर्वकल्पेऽपि प्रकृतसाध्यतावच्छेदकपर्याप्तावच्छेदकता-
प्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वनिवेशेनैव का-
नमयधूमत्वावच्छिन्नप्रकारताया अपि धूमत्वावच्छिन्नप्रकारता-
न धूमाभाववत्तानिश्चयप्रतिबध्यतावच्छेदकतया धूमाभावे हेतु-
सामानाधिकरण्यसङ्ग्रहसम्भवेन साध्यवत्ताज्ञानधर्मितावच्छेदका ये
ये धर्मा इत्यादिगुरुतरनिवेशो विफल इति । न च काञ्चनमयधूमत्वा-
वच्छिन्नप्रकारतायाः काञ्चनमयत्वप्रकारतानिरूपितधूमत्वावच्छिन्न-
विशेष्यतात्वेन काञ्चनमयत्वाभाववत्ताज्ञानस्यापि प्रतिबध्यतावच्छे-
दकतया काञ्चनमयत्वाभावादिवारणमशक्यमिति वाच्यम् । प्रका-
रताविशेष्यतयोरभेदेऽपि प्रकारतात्वेन प्रकारत्वावच्छिन्नत्वस्य सा-
ध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नत्वस्य
वा प्रतिबध्यताविशेषणत्वेनैव तद्वारणात् । यद्यपि साध्यतावच्छेद-
कावच्छिन्नप्रकारतानिरूपितविशेष्यताशालिनो वह्निमत्पर्वतवान्
देशः वह्निमत्पर्वतो देशवृत्तिरित्याकारकस्य एकत्र द्वयमिति रीत्या
वह्निघटवान् पर्वत इत्याकारकस्य च ज्ञानस्य विरोधिनि वह्निमत्प-
र्वताभावादौ वह्निघटोभयाभावादौ च हेतुसामानाधिकरण्येऽतिव्या-
प्तिः । तथापि धर्मितावच्छेदकताभिन्नसाध्यतावच्छेदकावच्छिन्नप्र-
कारत्वान्यप्रकारत्वानिरूपितमुख्यविशेष्यत्वावच्छिन्नत्वस्य प्रतिबध्य-
ताविशेषणत्वेनैव तद्वारणसम्भवः ॥

अथवा पूर्वकल्पेऽपि किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यवत्त्व-
ग्रहत्वव्यापकप्रतिबध्यत्वमेव निवेशनीयम् । काञ्चनमयत्वाभावा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देर्वारणाय पुनः प्रतिबध्यतायां साध्यग्रहत्वाव्यापकत्वं निवेशनीय-
मिति पूर्वकल्पस्यैव लघुत्वम्। न च गगनवान् गगनत्वादित्यादौ कि-
ञ्चिद्धर्मिकसाध्यवत्ताज्ञानसामान्यविरोधि-अवृत्तित्वधर्मिकहेत्वसा-
मानाधिकरण्यग्रहविरोधिनि अवृत्तित्वनिष्ठगगनत्वसामानाधिक
ण्येऽतिव्याप्तिरिति वाच्यम्। द्वितीयकल्पे गगनत्वसमानाधिकरण
वृत्तित्वे हेत्वाभासतावच्छेदकत्वसत्त्वेनातिव्याप्तिवारणाय स
ध्यवत्ताग्रहविरोधित्वेनैव, प्रथमकल्पेऽपि किञ्चिद्धर्मिकसाध्यव
ज्ञानत्वव्यापकप्रतिबध्यतायां साध्यवत्ताग्रहत्वाव्यापकत्वविशे
नैव तद्वारणसम्भवादिति चेत्।

अत्रोच्यते—गगनत्वहेतुकस्थले किञ्चिद्धर्मिकसाध्यवत्ताज्ञानस
मान्यविरोधिसाध्यवत्ताज्ञानसामान्याविरोधि यत्पर्वतावृत्तित्व
द्धर्मिकहेत्वसामानाधिकरण्यग्रहविरोधिनि गगनत्वसमानाधिक
णपर्वतावृत्तित्वेऽतिव्याप्तिरतस्तद्वारणाय साध्यवत्ताज्ञानधर्मित
वच्छेदका ये ये धर्मास्तत्तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञा
सामान्यविरोधित्वस्य पूर्वकल्पे निवेशावश्यकत्वेन पूर्वकल्पस्य गु
रुत्वमक्षतमेव। द्वितीयकल्पे च हेत्वाभासतावच्छेदकत्वदलेनैवोक्ता
तिव्याप्तिवारणसम्भवात् इति ध्येयम्॥ ७॥

इति श्रीकालीशङ्करसिद्धान्तवागीशविरचितं
साधारणक्रोडपत्रम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ श्रीकालीशङ्करसिद्धान्तवागीशविरचितं

असाधारणक्रोडपत्रम् ।

श्रीगणेशायनमः ॥

सर्वसपक्षव्यावृत्तत्वमसाधारणत्वमिति मूलम् ॥ सर्वसपक्षेति । ः साध्यवान्, पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रति· त्वमिति शिरोमणिः । यद्यप्येवं सव्यभिचारसामान्यलक्षणस्य द्धर्मिवृत्तित्वमित्यादिना बाधादिसाधारण्यवारणप्रकारो न स· ति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मिविशेषनियन्त्रितत्वा· तादृशरीत्या आदरे निरुक्तासाधारण्यस्यैवासङ्ग्रहापत्तेः । तथापि तपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिप्रकृतहेतुतावच्छेदकविशिष्टवै· ष्ट्यावगाहिज्ञाननिरूपिता या निरुक्तासाधारण्यविषयकत्वानव· च्छिन्नप्रतिबन्धकता तच्छून्यत्वे सति समूहालम्बनानुमितिविरो· धित्वस्य बाधप्रतिरोधव्यावृत्तस्य निरुक्तासाधारण्यसाधारणस्य स· व्यभिचारसामान्यलक्षणत्वसम्भवादिति भट्टाचार्यैणोक्तम् ॥

अत्रेदमवधेयम् । अथ पक्षवृत्तित्वघटितासाधारण्यस्य धर्मि· विशेषनियन्त्रितत्वेपि साध्यव्यापकीभूताभावप्रतियोगित्वांशमादायै· व यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रानुमितिविरोधित्वमक्षतमेवे· ति कथमुक्तं तादृशरीत्या आदरे निरुक्तासाधारण्यासङ्ग्रह इति चेत् ।

अत्राहुः-पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मिविशेषनिय· न्त्रितत्वेत्यनेन यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्रतत्रानुमितिविरोधि· त्वाभावेन निरुक्तासाधारण्यासङ्ग्रह इति नाभिहितम्, किन्तु मेय· त्वविशिष्टासाधारण्यवारकविशिष्टान्तराघटितत्वविरहादेव तदसं· ग्रह इत्यभिहितम् । यद्यद्धर्मिवृत्तित्वमिति लक्षणाक्रान्तं यत्साध्य· व्यापकीभूताभावप्रतियोगित्वरूपं विशिष्टान्तरं निरुक्तासाधार· ण्यस्य तदघटितत्वमक्षतमेवेति । न च विशिष्टान्तराघटितत्वशरी· रे एव यद्यद्धर्मिवृत्तित्वमित्याद्यनिवेश्य प्रकृतपक्षप्रकृतसाध्यावगा· हिज्ञाननिरूपितासाधारण्यविषयकत्वानवच्छिन्नप्रतिबन्धकताशून्य· त्वे सति अनुमितिविरोधित्वमेव निवेशनीयमतः साध्यव्यापकीभू·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताभावप्रतियोगित्वमात्रस्य तादृशविशिष्टान्तरत्वाभावादेवोक्तासाधारण्यासङ्ग्रह इति वाच्यम्। तथासति मेयत्वविशिष्टसाध्यव्यापकीभूताभावप्रतियोगित्वादावतिप्रसङ्गापातात् यद्यद्धर्मिवृत्तित्वमित्यादिदलस्य निरुक्तविशिष्टान्तराघटितत्वदलस्य च तत्र सत्त्वादिति सुधीभिर्विभावनीयम् ॥

असाधारणस्य पत्रिकान्तरम् ॥

॥ श्रीः ॥

पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमिति रोमणिः। यद्यपि सव्यभिचारसामान्यलक्षणस्य यद्यद्धर्मिवृत्तित्वमित्यादिना बाधादिसाधारण्यप्रकारो न सम्भवति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मिविशेषनियन्त्रितत्वात् तादृशरीत्या आदसङ्ग्रहापत्तेः। तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहितुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाननिरूपिता याऽसाधारण्यविषयकत्वानवच्छिन्नप्रतिबन्धकता तच्छून्यत्वे सति समूहालम्बनानुमितिविरोधित्वस्य बाधप्रतिरोधव्यावृत्तस्य निरुक्तासाधारण्यसाधारणस्य सव्यभिचारसामान्यलक्षणत्वसम्भवादिति भट्टी ॥

अत्रेयमनुपपत्तिः—नन्वत्र हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वनिवेशनमफलं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वनिवेशेनैव सर्वसामञ्जस्यात्। न च स्वरूपासिद्ध्यादावतिव्याप्तिः, प्रकृतसाध्यवैशिष्ट्यावगाहिज्ञाननिरूपिता या बाधादिप्रतिबन्धकता तच्छून्यत्वे सति समूहालम्बनानुमितिविरोधित्वस्य सत्त्वादिति वाच्यम्। समूहालम्बनानुमितिपदस्य पक्षे साध्यवैशिष्ट्यावगाहितद्व्याप्यहेत्ववगाह्यनुमितिपरत्वात्। न च वह्निमान् काञ्चनमयधूमादित्यादिस्थलीयहेत्वसिद्ध्यादावतिव्याप्तिरिति वाच्यम्। पक्षे साध्यवैशिष्ट्यावगाहिहेतुतावच्छेदकावगाहिज्ञाननिरूपितत्वस्य प्रतिबन्धकतायां विशेषणत्वेनैवतद्दोषस्यापि वारणात्-हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वानिवेशनमफलमिति चेन्न।

आचार्यमते एतल्लक्षणकरणात् स्वरूपासिद्धिवारणाय तन्निवेशसार्थक्यमिति ध्येयम् ॥

नव्यास्तु हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वानिवेशे हद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षकवह्निसाध्यकगगनहेतुकस्थलेऽवृत्तिगगने*ऽतिव्याप्तिः । गगनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितव्याप्तिग्रहविरोधित्वात् गगनप्रकारकबुद्धौ तस्य विरोधित्वादिति । न च विरोऽतिव्याप्तिवारणाय साध्यसामानाधिकरण्यग्रहाविरोधित्वस्याऽवश्यं निवेश्यतया तद्वारणाद्धेतुवैशिष्ट्यावगाहित्वनिवेशनं व्यर्थमिति वाच्यम् । व्याप्तौ साध्यसामानाधिकरण्यस्य प्रयोजनविरहेणानिवेशतया विरोधातिव्याप्तिवारणाय साध्यसामानाधिकरण्यग्रहाविरोधित्वविशेषणस्यानावश्यकतया तद्विशेषणसार्थक्यादिति ध्येयम् ॥

इति श्रीकालीशङ्करसिद्धान्तवागीशविरचितं
असाधारणक्रोडपत्रम् ।

---

*साधारणग्रन्थे साधननिष्ठावृत्तित्वस्य स्वरूपासिद्धिप्रभेदस्येति भट्टाचार्येणोक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ श्रीकालीशङ्करसिद्धान्तवागीशविरचितं

सत्प्रतिपक्षक्रोडपत्रम् ।

श्री गणेशायनमः ॥

साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धका[illegible] कलिङ्गकत्वमिति मूलम् ॥

वन्हिव्याप्याभावादिसाध्यकस्थले वन्ह्यादिसाध्यकानुमि[illegible] जननयोग्यया वन्ह्यादिव्याप्यवत्पक्षोपस्थित्या बाधनिश्चयरू[illegible] कार्यप्रतिरोधदशायामतिव्याप्तिवारणाय साध्यवत्ताज्ञानविरोधि[illegible] प्रथमोपस्थितिविशेषणम् । वह्निव्याप्यवत्पक्षोपस्थितेरपि साध्य[illegible] त्ताज्ञानप्रतिबन्धिकां वह्निव्याप्यवत्पक्षविषयकसमूहालम्बनरूपवह्नि[illegible] त्पक्षविषयानुमितिं प्रति स्वरूपयोग्यतया ययाश्रुतउक्तातिप्रसङ्[illegible] दुर्वारतया साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकाविषयित्वावच्छि[illegible] न्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयत्वपर्यन्तं समर्थान्तेन[illegible] विवक्षणीयमिति भट्टाचार्येणोक्तम् ॥

अथात्र वह्निव्याप्याभावाभाववत्वह्निमत्कालीनपर्वतो वह्निव्याप्याभाववानित्यादौ व्यावर्तकधर्मदर्शनाविधया साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदिका या तादृशपर्वतत्वावच्छिन्नविषयतानिरूपितवह्नित्वावच्छिन्नप्रकारता तदवच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयीभूतं यत्तादृशपर्वतो वह्निव्याप्यवानिति बाधज्ञानं तद्दशायामतिव्याप्तिः—उक्तस्थले साध्यवत्ताज्ञानं प्रति तादृशपर्वतधर्मिकवह्निमत्ताज्ञानत्वेनैव प्रतिबन्धकतया प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेऽप्यप्रतीकारात् । गगनाभाववदभाववत्कालीनगगनसाध्यकस्थले तादृशगगनाभावव्याप्यवत्तापरामर्शदशायामव्याप्त्यापत्तेश्च तादृशगगनाभावनिश्चयस्य ज्ञानवैशिष्ट्यानवच्छिन्नसाध्यवत्ताज्ञानप्रतिबन्धकत्वाभावात् इति ॥

मैवम् । साध्यवत्ताज्ञानस्य प्रतिबन्धकतावच्छेदिका सती प्रतिबध्यतावच्छेदिका या विषयता तदवच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताश्रयत्वविवक्षणेनैवोक्तातिव्याप्तिवारणसम्भवात् उक्तस्थले निरुक्तपर्वतधर्मिकवह्निमत्ताज्ञानस्य साध्यवत्ताज्ञानप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धकत्वेपि प्रतिबध्यत्वाभावात् । एतेन वह्निव्याप्याभावसाध्यकस्थले वह्नित्वावाच्छिन्नविषयताया अपि वह्निमान् वह्निव्याप्याभावाभाववानिति ज्ञानविशिष्टवह्निमत्ताज्ञानत्वावाच्छिन्नसाध्यवत्ताज्ञानप्रतिबन्धकतया तदवच्छिन्नकार्यतानिरूपितकारणताश्रयवह्निव्याप्यवत्तानिश्चयदशायामतिव्याप्तिः । एवं एहृद्यभावव्याप्यव्याप्याभावात्मकवह्निसाध्यकस्थले साध्यवताज्ञानप्रतिबन्धकं यद्वह्न्यभावव्याप्यवत्ताज्ञानं तत्कवन्ह्यभावव्याप्यवत्तानिश्चयकालेऽप्यतिव्याप्तिरित्यपि निरस्तम् । साध्यवताज्ञानप्रतिबन्धकतावच्छेदकविषयतायां प्रतिबध्यतावच्छेदकनिवेशेनोक्तातिव्याप्तिद्वयस्यापि वारणसम्भवात् । न चैवं साध्यवत्ताज्ञानप्रतिबध्यतावच्छेदकत्वमेव निवेश्यतां किं प्रतिबन्धकतावच्छेदकत्वनिवेशेनेति वाच्यम् । तथा सति वह्निव्याप्याभावाभावकवह्न्यभावव्याप्यसाध्यकस्थले साध्यवत्ताज्ञानप्रतिबन्धकीभूतं वह्निमताज्ञानं तज्जनकवह्निव्याप्यवत्तानिश्चयदशायां सत्प्रतिपक्षितत्वव्यवहारापत्तेः । वह्निव्याप्यवत्तानिश्चयेनाप्युक्तस्थले कार्यप्रतिबन्धादिति ध्येयम् ।

न च साध्यवत्ताज्ञानप्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वे सति साध्यवत्ताज्ञानप्रतिबध्यतानवच्छेदकविषयिताशून्यानुमितिनिष्ठकार्यता एवंक्रमेण कथं न निवेश्यत इति वाच्यम् । तथासति महानसीयवह्नीतरवह्न्यभाववान्पर्वतो वन्ह्यभाववानित्यादौ शुद्धवह्निव्याप्यवत्तापरामर्शादपीतरबाधसहकारेण महानसीयवन्ह्यनुमितेरेवोत्पत्त्या तादृशानुमितेश्च साध्यवत्ताज्ञानप्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वाभावात् वह्निव्याप्यवान् वन्ह्यभावव्याप्यवानित्याकारकउभयपरामर्शदशायां सत्प्रतिपक्षत्वानुपपत्तिरिति ध्येयम् ॥

न च साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नकार्यतैव निवेश्यताम् किमनुमितिनिष्ठत्वनिवेशेनेति वाच्यम् । समानविषयकस्मृतौ समानविषयकानुभवस्य तद्धर्मिकतत्प्रकारकशाब्दं प्रति योग्यताज्ञानविधया तद्धर्मिकतद्वत्ताज्ञानस्य हेतुतया तादृशकार्यतामादाय बाधनिश्चयकालेऽतिव्याप्तिवारणार्थमेवानुमितिनिष्ठत्वं निवेशनीयम् ॥ १ ॥

समानत्वं चागृहीताप्रामाण्यकप्रकृतसाध्यसिद्ध्यौपयिकपरामर्शकालीनत्वमिति शिरोमणिः । अथागृहीताप्रामाण्यकत्वशरीरेऽन्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यव्याप्त्यंशे व्यतिरेकव्याप्त्यंशे च यदप्रामाण्यं तदग्रहाभावविशिष्टत्वं निवेश्यम्। तत्तद्व्याप्त्यंशेऽप्रामाण्यग्रहसत्त्वे तत्तद्व्याप्त्यवगाहिपरामर्शस्य सत्प्रतिपक्षत्वाप्रयोजकत्वात्। तथा चान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायामन्वयव्याप्त्यंशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षता न स्यात्। न च स्वयोग्यकानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्य तदभावविशिष्टत्वं निवेशनीयम्, विरोधित्वं च स्वसमानविशेष्यकत्वावच्छिन्नं ग्राह्यम्, तेन विरोधिपरामर्शादिव्यावृत्तिरिति वाच्यम्। एवं सति तादृशव्याप्ति विषयकसमूहालम्बनपरामर्श एकतरांशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षत्वानुपपत्तिरिति चेन्न। स्वीययत्किञ्चित्विषयताप्रयोज्यानुमितिविरोधिज्ञानसामान्याभावस्य निवेशनीयत्वात्। विरोधित्वं विरोधिपरामर्शव्यावृत्तत्वं ग्राह्यम्। समूहालम्बनपरामर्शस्थले यादृशव्याप्त्यंशेऽप्रामाण्यज्ञानं नास्ति तादृशव्याप्तिविषयताप्रयोज्यानुमितिविरोधिज्ञानसामान्याभावसत्त्वात् न तत्र सत्प्रतिपक्षत्वानुपपत्तिरिति भट्टाचार्येणोक्तम्॥

अत्रेदं बोध्यम्। अन्वयव्यतिरेकव्याप्त्युभयविषयताप्रयोज्यानुमितिनिष्ठप्रतिबन्धकत्वस्य समूहालम्बनस्थलीयउक्ताप्रामाण्यग्रहेपि सत्त्वेन न तद्दोषतादवस्थ्यम्। न च यादृशव्याप्त्यंशेऽप्रामाण्यज्ञानं नास्ति तादृशव्याप्तिविषयतामात्रप्रयोज्यत्वं वक्तव्यमिति न दोष इति वाच्यम्। तदीयपक्षधर्मताविषयतावा अपि प्रयोजकतया तदीययत्किञ्चिद्विषयतामात्रप्रयोज्यानुमितेरप्रसिद्धेः। यदि च स्वीययत्किञ्चिद्विषयताप्रयोज्यानुमितित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालिग्रहत्वेनाप्रामाण्यज्ञानं निवेश्यते तदा विरोधिपरामर्शव्यावृत्तप्रतिबन्धकत्वनिवेशनं व्यर्थं विरोधिपरामर्शस्य तादृशधर्मप्रतिबध्यतावच्छेदकत्वाभावादिति चेत्।

अत्र केचित्—स्वीययत्किञ्चित्विषयताप्रयोज्यानुमितिसामान्यविरोधित्वनिवेशाभिप्रायेण विरोधिपरामर्शव्यावृत्तविरोधित्वं निवेशितं पूर्वोक्तरीत्या निवेशे विरोधिपरामर्शव्यावृत्तत्वं नोपादेयमित्याहुः॥

अत्रेदं चिन्त्यम्। स्वीययत्किञ्चिद्विषयताप्रयोज्यानुमितिसामान्यविरोधित्वनिवेशे पूर्वकल्पेऽपि स्वयोग्यकानुमितिसामान्यविरोधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वनिवेशेनैव सामञ्जस्ये तत्कल्पपरित्यागस्यानौचित्यापत्तेरिति ध्येयम् ॥ २ ॥

यतु प्रामाण्यनिश्चयेनाधिकबलतया बाधकस्य विरोधिपरामर्शस्य वारणाय समानेतीति शिरोमणिः ।

समानेतीति । समानत्वं च विरोधिबोधानुपधायकत्वम् विरोधिबोधाव्यवहितप्राक्क्षणविशिष्टत्वाभाव इति यावत् । तत्प्रतिबध्यकात्वं च तदभावातिरिक्तसकलप्रकृतसाध्यानुमितिकारणसमवधानकालावच्छिन्नत्वे सति तत्प्रयुक्तकार्यानुपधायकत्वम् । सकलकारणसंग्रहादुभयपरामर्शसत्त्वे बाधेन हीनबलस्य हेतोर्न सत्प्रतिपक्षत्वम् । सत्प्रतिरोधनिवेशश्च स्वपरामर्शे प्रामाण्यनिश्चयेनाधिकबलहेतावतिव्याप्तिवारणायेति भट्टाचार्यणोक्तम् ।

न च तन्मात्रप्रयुक्तकार्यानुपधायकत्वनिवेशेनैवोभयपरामर्शसत्त्वे बाधेन हीनबलहेतोः सत्प्रतिपक्षत्ववारणसंभवे प्रतिरुद्धकार्यकत्वशब्दे सत्यन्तनिवेशो व्यर्थ इति वाच्यम् । प्रतिबन्धकज्ञानस्येव प्रतिबन्धकतावच्छेदकविषयताया अपि कार्यानुत्पादप्रयोजकतया तन्मात्रप्रयुक्तत्वनिवेशेऽसंभवापत्तिरिति ध्येयम् ॥

अथ तदभावातिरिक्तसकलप्रकृतसाध्यानुमितिकारणसमवधानकालावच्छिन्नत्वे सति तादृशकार्यानुपधायकत्वरूपतत्प्रतिरुद्धकार्यकत्वनिवेशेनैव सामञ्जस्ये तत्प्रयुक्तत्वनिवेशो व्यर्थ इति चेत् ।

अत्र केचित् यत्रादावुभयपरामर्श एवाप्रामाण्यज्ञानं तत्राप्रामाण्यज्ञानकाले सत्प्रतिपक्षत्वापत्तिरतस्तत्प्रयुक्तत्वनिवेशः । न चाप्रामाण्यज्ञानकाले विरोधिपरामर्शाभावातिरिक्तसकलसाध्यानुमितिकारणमेव नास्ति तत्राप्रामाण्यज्ञानाभावविशिष्टपरामर्शात्मककारणविरहादिति वाच्यम् । पूर्वक्षणावच्छेदेनोक्तपरामर्शस्यैवाप्रामाण्यज्ञानाभावविशिष्टतया साध्यानुमितिकारणतावच्छेदकाश्रयत्वात् सकलकारणसमवहितत्वस्वीकारे गौरवेण कारणतावच्छेदकविशिष्टाधिकरणत्वनिवेशादित्याहुः ॥

वस्तुतोऽप्रामाण्यज्ञानाभावस्य पृथक् कारणतामताभिप्रायकोऽयं ग्रंथः तथा च साध्यानुमितिसकलकारणमध्ये गौरवेण प्रामाण्यज्ञानाभावव्यक्तीनां न निवेशः । अप्रामाण्यज्ञानकालेऽतिव्याप्तिस्तु तत्प्रयुक्तत्वं निवेश्य वारणीयेति युक्तमुत्पश्यामः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अगृहीताप्रामाण्यकत्वसंवलितयोग्यत्वोपादाने तु बाधोपस्थिति-समर्थपरामर्शकालीनसाध्यासिद्धिसमर्थपरामर्शविषयत्वं तद्वाच्यमिति शिरोमणिः।

बाधोपस्थितिसमर्थेति। साध्यवत्ताज्ञानप्रतिबन्धिका सती त[illegible] त्प्रतिबध्या याऽनुमितिस्तद्योग्यतेत्यर्थः। साध्यवत्ताधीप्रतिबध्यत[illegible] निवेशात्साध्याभावव्याप्यानुमितिसमर्थपरामर्शकाले नातिप्रस[illegible] इति भट्टाचार्येणोक्तम्॥

अथात्र प्रतिबध्यत्वनिवेशेऽपि वह्न्यभावव्याप्यसाध्यकस्थले [illegible] ध्यवत्ताधीप्रतिबन्धिका सती तत्प्रतिबध्या या वह्न्यभावव्याप्या[illegible] व्याप्यवह्निमानित्याकारकानुमितिस्तत्समर्थवह्न्यभावव्याप्याभाव[illegible] प्यवह्निव्याप्यवत्तापरामर्शदशायामेवं वह्निव्याप्याभावव्याप्यवह्न्यभा[illegible] वसाध्यकस्थले साध्यवत्ताधीप्रतिबन्धिका सती तत्प्रतिबध्या या [illegible] ह्निव्याप्यानुमितिस्तत्समर्थवह्निव्याप्यवत्तापरामर्शदशायां चाति[illegible] सङ्गो दुर्वार इति कार्यप्रतिरोधनिवेश आवश्यक इति चेत्।

साधारणोक्तपत्रिकोक्तरूपावच्छिन्नप्रतिबध्यत्वप्रतिबन्धकत्वनिवे[illegible] शेनैवोक्तातिप्रसङ्गद्वयस्य वारणसंभवादिति ध्येयम्।

इदमत्रावधेयम्। एकरूपावच्छिन्नप्रतिबध्यत्वप्रतिबन्धकत्वानिवेशे-ऽपि वह्निव्याप्याभाववद्वह्न्यभाववत्कालीनह्रदो वह्निव्याप्यवानित्या-दौ तादृशह्रदत्वावच्छेदेन साध्यवत्ताज्ञाननिरूपितैकरूपावच्छिन्नप्रति-बध्यत्वप्रतिबन्धकत्वोभयवती या तादृशह्रदधर्मिकवह्न्यभावानुमिति-स्तत्समर्थवह्न्यभावव्याप्यवत्तापरामर्शदशायां सत्प्रतिपक्षत्वापत्तिर्दु-र्वारैवेति॥ न चोक्तस्थले तादृशह्रदधर्मिकवह्न्यभाववत्ताज्ञानस्य सा-ध्यवत्ताज्ञानं प्रति व्यावर्तकधर्मदर्शनयैव प्रतिबन्धकत्वं तच्च ज्ञानवै-शिष्ट्यावच्छिन्नानुमितिप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्न-त्वनिवेशेनैवोक्तातिप्रसङ्गव्युदास इति वाच्यम्। उक्तस्थले तादृश-विशिष्टह्रदत्वावच्छेदेन साध्यवत्ताज्ञानं प्रति विशिष्टह्रदधर्मिकसा-ध्याभाववत्तानिश्चयत्वेन प्रतिबन्धकतयैवोपपत्त्या ज्ञानविशिष्टज्ञान-त्वेन प्रतिबन्धकत्वाकल्पनात् प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छि-न्नत्वानिवेशे यत्र बाधप्रतिबन्धकतैव ज्ञानवैशिष्ट्यानवच्छिन्ना तत्र स-त्प्रतिपक्षत्वानुपपत्तिश्च॥ न च कार्यप्रतिरोधनिवेशेपि उक्तपक्षस्थले एव वह्निव्याप्यवह्न्यभावव्याप्याभावोभयस्य साध्यतायामुक्तातिप्रसङ्गो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वारः वह्न्यभावव्याप्यवत्तापरामर्शेण वह्न्यभावव्याप्याभावघटितोभ-
यानुमितित्वरूपकार्यप्रतिरोधादिति वाच्यम् । विरोधिपरामर्शप्रयुक्त-
यादृशधर्मानुत्पादस्तादृशधर्मावच्छिन्नकार्यकप्रकृतपरामर्शविषयत्व-
विवक्षाया कथंचिद्धारयितुं शक्यत्वात् । वह्न्यभावव्याप्यवत्तापरामर्श-
य वन्ह्यभावव्याप्याभावानुमितित्वावच्छिन्नस्यैवानुत्पादप्रयोजकत-
या प्रकृतसाध्यीयपरामर्शकार्यतावच्छेदकावच्छिन्नानुत्पादाप्रयोजक-
दस्तु वा कार्यप्रतिरोधनिवेशेऽप्येतद्दोषो दुर्वार इति चिन्त्यम् ॥४॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकप्रकृतसाध्यतावच्छेदका-
च्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता-
ष्टिका सती विशिष्टपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपित-
तबन्धकतावच्छेदकनिरुक्तपक्षसाध्यवैशिष्ट्यग्रहप्रतिबन्धकताव-
च्छेदकविषयित्वावाच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छे-
दका यादृशविशिष्टविषयिता तादृशानुमितिः समुदितार्थ इति
भट्टाचार्येणोक्तम् ॥

अत्र सत्यन्तदले प्रकृतपक्षकत्वमनिवेश्य किञ्चिद्धर्मावच्छिन्नपक्ष-
कत्वानिवेशे यत्किञ्चिद्धर्मपदेन वन्ह्यभावव्याप्यव्याप्याभाववद्धृदत्वमादाय तदवच्छिन्नविशेष्यकप्रकृतसाध्यानुमितिमादाय सत्प्र-
तिपक्षोन्नायके वन्ह्यभावव्याप्यव्याप्यवत्ह्रदादावतिव्याप्तिरतस्त-
न्निवेशः । एवमुन्नेयदले पक्षांशे तदप्रवेशे वह्निव्याप्याभावसा-
ध्यकस्थले किञ्चित्पक्षपदेन वन्ह्यभाववत्पर्वतत्वादिकमादाय तदव-
च्छिन्नविशेष्यकप्रकृतसाध्यानुमितिविरोध्युन्नायके केवलवह्निव्याप्य-
वत्पर्वतादिरूपबाधेऽतिव्याप्तिरतस्तद्दलेऽपि तन्निवेशः ॥

अथ सत्यन्तदले प्रकृतानुमित्यवृत्तित्वमेव निवेश्यतां किं तादृशप्र-
तिबन्धकतावच्छेदकत्वपर्यन्तनिवेशेनेतिचेन्न । वह्न्यभाववत्वह्न्यभाव-
व्याप्यव्याप्यवत्कालीनह्रदो वह्निमानित्यादौ पक्षतावच्छदकवधया
वह्न्यभावावच्छेदकग्रहाविषयीभूतह्रदत्वावच्छेदेन वह्न्यभावव्याप्य-
व्याप्यवत्त्वादौ प्रकृतानुमित्यवृत्तिविषयिताके सत्प्रतिपक्षोन्नायके
वह्न्यभावव्याप्यव्याप्याभावव्याप्यवान् ह्रदो वह्निमानित्यादौ वह्न्यभाव-
व्याप्यव्याप्यवद्ध्रदादिरूपसत्प्रतिपक्षोन्नायके चातिव्याप्तिवारणाय
तन्निवेशस्यावश्यकत्वात् । तन्निवेशे च वह्न्यभावावच्छेदकज्ञानसमा-
नकालीनवह्न्यभावव्याप्यव्याप्यवान् ह्रद इत्यादिज्ञाने प्रकृतानुमिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबन्धकताशून्यतादृशविशिष्टविषयितासत्त्वात् अनतिरिक्तवृत्तित्व-रूपतादृशप्रतिबन्धकतावच्छेदकत्वविरहात् नातिव्याप्तिरिति ध्येयम् ॥

केचित्तु सत्यन्तस्य उक्तार्थकत्वे वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदात्मकाश्रयासिद्ध्या दावतिव्याप्तिः, स्वमते च उन्नेये उन्नायके विरोधयन्तविशेषण तयैव उक्तातिव्याप्तिवारणसंभवात् । न चैतन्मतेऽपि तादृशानुमि वृत्तिविषयितायां विशिष्टपक्षादिग्रहप्रतिबन्धकतानवच्छेदकत्व वेशेनैव उक्तातिव्याप्तिवारणसंभव इति वाच्यम् । तथासति वह्न वव्याप्याभाववान् ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्रदा सत्प्रतिपक्षेऽव्याप्तिः तादृशसत्प्रतिपक्षविषयितायां विशिष्टपक्ष प्रतिबन्धकतानवच्छेदकत्वाभावात्, स्वमते च विरोधयन्तदलेन त्यन्तदलघटकप्रतिबध्यत्वोन्नेयदलघटकप्रतिबध्यत्वयोर्विशिष्टपक्षग्र हत्वाव्यापकत्वविवक्षयैव सामञ्जस्यात् । एवं ह्रदो वह्न्यभावव्याप्य व्याप्याभाववह्न्युभयवानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदात्मक बाधेऽतिव्याप्तिश्च तादृशबाधविषयितायां विशिष्टपक्षग्रहप्रतिबन्ध कतानवच्छेदकत्वस्यापि सत्त्वात्, स्वमते दलद्वये एकरूपावच्छिन्न प्रतिबध्यतानिवेशेनैव तद्वारणसंभवात् एतदस्वरसेनैव अथवे त्यादिना प्रतिबध्यतायामेकरूपावच्छिन्नत्वं निवेशितम् । एतेन वह्न्यभावव्याप्यव्याप्यवद्ध्रदविषयितायां प्रतिबध्यतावच्छे-दकत्वाभावात् साध्यवैशिष्ट्याभावाधिकरणत्वाप्रयोजकत्वेन स्वविष-यताप्रयोज्यविशिष्टान्तरविषयत्वाप्रयोज्यतादृशसाध्यवैशिष्ट्यावगा-हित्वाभावाधिकरणतावत्त्वरूपाविशिष्टान्तरघटितत्वविरहादेव सत्प्रति-पक्षोन्नायकेऽतिव्याप्तिविरहात् सत्यन्तदलं व्यर्थमिति पूर्वपक्षोपि निरस्तः। सत्यन्तदलानुक्तौ वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्नि-मान् इत्यादौ वह्न्यभावव्याप्यव्याप्याभाववह्न्युभयवानित्यादौ वह्न्य-भावव्याप्यव्याप्यवद्ध्रदादावतिव्याप्तेर्दुर्वारत्वात् तादृशह्रदादिविषयि-तायां साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकत्वात् ह्रदो वह्निमानित्यादौ वह्न्यभाववान् वह्न्यभावव्याप्यव्याप्यवान् वह्न्यभाव-व्याप्यव्याप्यवांश्च ह्रद इत्यादिज्ञानीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्ध-कतावच्छेदकत्वस्य सत्प्रतिपक्षोन्नायकविषयतायां अपि सत्त्वेन सर्वत्र सत्प्रतिपक्षोन्नायकेऽतिव्याप्तितादवस्थ्याच्चेत्याहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रैवमपि सत्यन्तदलं व्यर्थं उन्नेयविषयितायां प्रकृतसाध्यपक्षवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकत्वमनिवेश्य तादृशग्रहप्रतिबध्यतावच्छेदकत्वानिवेशेनैव सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिवारणसंभवात् सत्प्रतिपक्षविषयतायां तादृशग्रहप्रतिबध्यतावच्छेदकत्वाभावादिति।

न च वह्न्यभावव्याप्याभावव्याप्यवान्-ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदादावतिव्याप्तिरिति वाच्यम्। विशिष्टपक्षसाध्यग्रहप्रतिबन्धकतानवच्छेदक इत्यत्रापि विशिष्टपक्षसाध्यग्रहप्रतिबध्यतावच्छेदकत्वनिवेशेनैव तद्वारणसंभवादिति। एवं ह्रदो वह्न्यभावव्याप्याभावव्याप्यवान् वह्निव्याप्यवान् वा इत्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदे वह्न्यभावव्याप्यवद्ध्रदे वाऽतिव्याप्तिवारणाय सत्यन्तदलनिवेशस्यावश्यकत्वात्।

यत्तुक्तोन्नेयविषयितायां विशिष्टपक्षसाध्यग्रहप्रतिबध्यतानवच्छेदकत्वनिवेशे वह्निव्याप्यवद्ध्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्रदादिरूपसत्प्रतिपक्षेऽव्याप्तिस्तादृशसत्प्रतिपक्षोन्नेयविषयितायां विशिष्टपक्षग्रहप्रतिबध्यतानवच्छेदकत्वात् इति। तत्तुच्छम् प्रतिबन्धकतायां विशिष्टपक्षसाध्यग्रहत्वाव्यापकत्वनिवेशेनैवोक्ताव्याप्तिवारणसंभवात्। विशिष्टपक्षसाध्यग्रहाविरोधित्वनिवेशपक्षेपि प्रतिबध्यतायामेव विशिष्टपक्षसाध्यग्रहत्वाव्यापकत्वनिवेशस्यावश्यकत्वात्। वह्निमद्ध्रदो वह्न्यभावव्याप्याभाववानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदात्मकसत्प्रतिपक्षाव्याप्तेर्दुर्वारत्वादित ध्येयम्।

अथैवमुन्नेयविषयितायां प्रकृतपक्षसाध्यविशिष्टग्रहप्रतिबध्यतावच्छेदकत्वमेव निवेश्यम् उक्तदोषवारणाय सत्यन्तदले वरमनुमित्यवृत्तित्वमेव निवेश्यतां तावताप्यनुमितिप्रतिबन्धकतावच्छेदकत्वनिवेशापेक्षया लाघवादिति चेन्न। एवमपि ह्रदो वह्निव्याप्यवह्न्यभावव्याप्याभावव्याप्योभयवानित्यादौ वह्न्यभावव्याप्यवद्ध्रदादावतिव्याप्तिः। न च तथापि उन्नेयविषयितायामेव प्रकृतपक्षसाध्यवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकत्वमिव तादृशग्रहप्रतिबध्यतावच्छेदकत्वमपि निवेश्यताम् तावतैवोक्तदोषवारणसम्भवादिति पृथक् सत्यन्तदलनिवेशो व्यर्थ इति वाच्यम्। एवमपि ह्रदो वह्निव्याप्यवानित्यादौ वह्निव्याप्याभावव्याप्यवह्न्यभावव्याप्यवद्ध्रदे ह्रदो वह्न्यभावव्याप्यवह्निमानित्यादौ वन्ह्यभावव्याप्यव्याप्यवद्ध्रदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चातिव्याप्तेर्दुर्वारत्वात् ।

एतेन प्रकृतपक्षसाध्यविशिष्टग्रहत्वव्यापकप्रतिबध्यत्वप्रतिबन्धकत्वयोस्तादृशग्रहनिरूपितप्रतिबध्यत्वप्रतिबन्धकत्वयोश्चैकरूपावच्छिन्नत्वनिवेशेनैवोक्तातिव्याप्तिद्वयवारणसम्भवः तद्व्याप्यवत्ताज्ञाने तद्व्याप्याभावव्याप्यतदभाववत्ताज्ञाननिरूपितप्रतिबध्यत्वप्रतिबन्धकत्वयोः सत्त्वेपि तयोरेकरूपावच्छिन्नत्वाभावादिति पृथक् सत्यन्तदलमनुपादेयमेवेति केषांचित् प्रलपितमप्यपास्तम् ।

वह्निव्याप्याभाववद्वन्ह्यभाववत्कालीनह्रदत्वावच्छेदेन वह्नि[illegible]प्यसाध्यकस्थले तादृशह्रदत्वावच्छेदेन वह्निव्याप्यवत्ताज्ञानं [illegible] तादृशह्रदधर्मिकवन्ह्यभाववत्ताज्ञानस्यैकरूपावच्छिन्नप्रतिबध्यत्व[illegible]बन्धकत्वोभयसाधनतादृशप्रतिबध्यत्वप्रतिबन्धकत्वोभयावच्छेदका[illegible]तवन्ह्यभाववत्तादृशह्रदत्वावच्छिन्नविषयित्वावच्छिन्नानुमितिनिष्ठज[illegible]तानिरूपितजनकतावच्छेदकविषयिताके वह्न्यभावव्याप्यवत्तादृशह्र[illegible] एवं वन्ह्यभावव्याप्याभाववद्वह्निमत्कालीनह्रदत्वावच्छेदेन वह्निसाध्य[illegible]स्थले तादृशह्रदत्वावच्छेदेन वह्निमत्तावुद्धि प्रति तादृशह्रदधर्मिक[illegible]वन्ह्यभावव्याप्यवत्ताज्ञानस्यैकरूपावच्छिन्नप्रतिबध्यत्वप्रतिबन्धकत्वोभयसत्त्वात्तदुभयावच्छेदकभूतवह्न्यभावव्याप्यवत्तादृशह्रदत्वावच्छिन्नविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताके वन्ह्यभावव्याप्यवत्तादृशह्रदे चातिव्याप्तेर्दुर्वारत्वादिति कृतं पल्लवितेन ।

अथ तथापि आश्रयासिद्ध्युन्नायकेऽतिव्याप्तिवारणाय विशिष्टपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वमुन्नेयविषयितायां निवेशितं तदपेक्षया लाघवाद्विशिष्टपक्षसाध्यानुमितिवृत्तित्वमेव कुतो न निवेशितम्, तावतैव कांचनमयह्रदो वह्निमानित्यादौ कांचनमयत्वाभाववद्ध्रदादिविषयितायां तादृशानुमित्यवृत्तित्वात् कांचनमयत्वाभावव्याप्यवद्ध्रदादावतिव्याप्तिवारणसम्भवात् । वन्ह्यभाववद्ध्रदादिविषयितायां विशिष्टपक्षसाध्यविषयकह्रदो वह्न्यभाववानित्याद्यनुमितिवृत्तित्वेन सत्प्रतिपक्षसंग्रहाच्चेति चेन्न ।

वह्निव्याप्यवद्ध्रदो वह्निमानित्यादौ संयोगः संयोगव्याप्यवत्संयोगवानित्यादौ च वन्ह्यभावव्याप्यवद्ध्रदात्मके संयोगाभावव्याप्यवत्संयोगात्मके च सत्प्रतिपक्षेऽव्याप्तिः वन्ह्यभाववद्ध्रदात्मकोन्ने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याविषयिताया विशिष्टपक्षविषयकानुमितौ संयोगाभाववत्संयोगात्मकोन्नेयविषयितायाश्च विशिष्टसाध्यविषयकानुमितौ प्रवृत्तिरिति ध्येयम् ॥

अथ तथाप्युन्नेयविषयितायां प्रकृतानुमित्यवृत्तित्वमेव निवेश्यताम् तादृशानुमितिप्रतिबन्धकतावच्छेदकत्वनिवेशनेनेति चेन्न । वन्ह्यभाव्याप्यव्याप्यवद्वन्ह्यभावव्याप्यवत्कालीनह्रदो वन्ह्यभावव्याप्याभावत्यादौ प्रकृतानुमित्यवृत्तिविषयिताकस्य पक्षतावच्छेदकाविधया भावव्याप्यव्याप्यात्मकसाध्याभावावच्छेदकत्वग्रहविषयीभूतस्य भावव्याप्यवद्ध्रदत्वावच्छिन्नस्योन्नायके ह्रदत्वावच्छेदेन वन्ह्यभावव्याप्यवत्तात्मकबाधेऽतिव्याप्यापत्तेः। तन्निवेशे च तादृशपक्षज्ञानसमानकालीनवन्ह्यभावव्याप्यवान् ह्रद इति ज्ञानेऽनुमितिप्रतिबन्धकताशून्ये तद्विषयितासत्त्वात् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविरहान्नातिव्याप्तिः । एवं वन्ह्यभावाभाववद्वन्ह्यभावव्याप्याभाववत्कालीनह्रदो वन्ह्यभावव्याप्याभाववानित्यादौ प्रकृतानुमित्यवृत्तिविषयिताकस्य वन्ह्यभाववद्वन्ह्यभावाभाववद्वन्ह्यभावव्याप्याभाववत्कालीनह्रदस्योन्नायके वन्ह्याभावव्याप्यवत्तादृशह्रदात्मकबाधे तथा वह्निव्याप्यवद्ह्रदो वन्ह्यभावव्याप्याभाववानित्यादौ अनुमित्यवृत्तिविषयिताके वन्ह्यभाववद्ध्रदस्योन्नायके वन्ह्यभावव्याप्यवद्ध्रदात्मकबाधे चातिव्याप्यापत्तेश्च । स्वमते चोक्तस्थलद्वये वन्ह्यभाववद्ध्रदविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावादेव नातिव्याप्तिरिति ध्येयम् ॥

ननु तथापि वह्न्यभाववद्वह्न्यभावव्याप्यवत्कालीनह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवत्तादृशह्रदे चातिव्याप्तिः वह्न्यभावव्याप्यव्याप्यवत्तादृशह्रदनिश्चयस्य वह्न्यभावव्याप्यवत्तावच्छेदेन साध्याभावावगाहितया तादृशह्रदे साध्याभावावच्छेदकत्वग्रहविषयीभूतवह्न्यभावव्याप्यव्याप्यावगाहितया च सत्यन्तदलाक्रान्तत्वात् सत्यन्तघटकप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशे च प्रतिहेतुव्यापकताघटितसत्प्रतिपक्षाव्याप्तिः । न च यत्किञ्चिद्धर्मावच्छिन्नव्यापकत्वप्रकारतानिरूपितसाध्याभावविषयित्वानवच्छिन्नज्ञाननिष्ठावच्छेदकताकान्यत्वस्य प्रतिबन्धकताविशेषणत्वे सामञ्जस्यमिति वाच्यम् । एवमपि प्रकृतहेतुभिन्ने पक्षवृत्तित्वविशेषितसाध्यव्यापकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूताभावप्रतियोगित्वरूपसत्प्रतिपक्षेऽव्याप्त्यापत्तेः। किञ्च वह्न्यभा-
ववद्वन्ह्यभावव्याप्यव्याप्यवत्कालीनह्रदत्वावच्छिन्नधर्मिकवह्निमत्ताबु-
द्धिं प्रति तादृशह्रदत्वावच्छेदेन वह्न्यभावव्याप्यव्याप्यवत्तानिश्चय-
त्वेन प्रतिबन्धकतयैवोपपत्तौ ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकत्वे
मानाभावादुक्ताव्याप्तितादवस्थ्यापत्तेः। वह्न्यभावव्याप्यव्याप्यवद्व
ह्न्यभावव्याप्यवत्कालीनह्रदो वह्न्यभावव्याप्यव्याप्याभाववानित्यादौ
तादृशह्रदे वह्न्यभावव्याप्यवत्त्वनिश्चयस्य वह्न्यभावव्याप्यावच्छे
साध्याभावावगाहितया प्रकृतपक्षे वह्न्यभावव्याप्यावगाहितया च
मितिप्रतिबन्धकत्वेन तादृशप्रतिबन्धकतावच्छेदकविषयिताकव
भावव्याप्यवत्तादृशह्रदत्वावच्छिन्नोन्नायकवह्न्यभावव्याप्यव्याप्यत्व
दृशह्रदात्मकबाधे वह्न्यभावव्याप्यवद्वह्न्यभाववत्कालीनह्रदो वह्न्य
भावव्याप्याभाववानित्यादौ च प्रकृतपक्षे वह्न्यभाववत्तानिश्चयस्य
क्तरीत्याऽनुमितिप्रतिबन्धकत्वेन तादृशप्रतिबन्धकतावच्छेदकवि
यिताकवह्न्यभाववत्प्रकृतपक्षोन्नायके वह्न्यभावव्याप्यवत्प्रकृतपक्ष
त्मकबाधे च बाधप्रतिबन्धकतामादायातिव्याप्तेर्दुर्वारतापत्तेश्च। एतेन
प्रागुक्तस्थले जलवान् वह्न्यभाववान् जलवांश्च तादृशपक्षः शैवाल-
वान् तादृशपक्ष इत्यादिनानाविधनिश्चयसाधारण्यानुरोधेन ज्ञानवै-
शिष्ट्यावच्छिन्नप्रतिबन्धकतास्वीकारेऽपि न निस्तारः। अत एव
नानानिश्चयसाधारणसाध्याभावत्वावच्छिन्नप्रकारताविशिष्टपक्षताव-
च्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रागुक्तस्थले प्रतिबन्ध-
कत्वं वाच्यम्। विशेष्यतायां प्रकारतावैशिष्ट्यं च स्वनिरूपकज्ञान-
समानाधिकरणज्ञानीयत्व-स्वनिरूपितविशेष्यतावच्छेदकधर्मनिष्ठप्र-
कारतानिरूपितत्वोभयसम्बन्धेन। तथाच प्रागुक्तस्थले वह्न्यभाववज्ज-
लादिमद्वृत्तिजलवत्तादृशपक्षरूपविशिष्टान्तरविषयतात्वव्यापकीभूत-
साध्याभावप्रकारताविशिष्टतादृशपक्षविषयतात्वावच्छिन्नप्रयोज्यत्व-
स्य स्वविषयताप्रयोज्यसाध्यावगाहित्वाभावाधिकरणतायामसत्त्वेन
विशिष्टान्तरघटितत्वनिवेशादेव नातिव्याप्तिरिति कस्यचित्समाधा-
नमपि हेयम्। उक्तरीत्या प्रथमोक्तातिव्याप्तिवारणेऽपि पश्चादुक्ताति-
व्याप्तिद्वयस्य दुर्वारत्वात्। प्रतिहेतुव्यापकताघटितसत्प्रतिपक्षनि-
श्चयस्यापि नानाविधनिश्चयसाधारणेन स्वनिरूपितज्ञानसमानाधिकर-
णज्ञानीयत्व-स्वनिरूपितव्यापकत्वप्रकारतानिरूपितप्रकारतावच्छेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन साध्याभावत्वावच्छिन्नविशेष्यताविशिष्टपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकत्वस्य वक्तुमशक्यतया उक्तरीत्या तादृशसत्प्रतिपक्षेऽपि विशिष्टान्तराघटितत्वस्यासत्त्वप्रसङ्गाच्च। नानाविधनिश्चयाधारण्यानुरोधेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतास्वीकारे वह्न्यभावव्याप्यव्याप्यवद्वह्न्यभावव्याप्यवत्कालीनह्रदो वह्न्यभावव्याप्यव्याप्याभाववान् इत्यादिस्थलीयतादृशपक्षविशेष्यकवह्न्यभावव्याप्यव्याप्यस्यापि ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकत्वं वाच्यम्। तथा च यदलप्रविष्टप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेनातिव्याप्तिवारणसम्भव इति वाच्यम्। तथासति गगनाभावाभाववत्कालीनगगनसाध्यकसत्प्रतिपक्षाव्याप्तिः—तादृशगगनाभावाभाव्यात्मकसत्प्रतिपक्षोन्नेयतादृशगगनाभावज्ञानेन ज्ञानविशिष्टज्ञाननैव प्रतिबन्धकत्वादिति चेत्।

अत्राहुः-उन्नेयविषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वमिव प्रतिबध्यतावच्छेदकत्वमपि निवेश्यम् तावतैवोक्तातिव्याप्तीनां निराससम्भव इति। उन्नेयविषयितायां प्रतिबन्धकतावच्छेदकत्वानिवेशे वह्न्यभावाभाववद्वह्न्यभावव्याप्याभाववत्कालीनह्रदो वह्न्यभावव्याप्याभाववानित्यादौ वह्न्यभावव्याप्यवद्ध्रदात्मकबाधेऽतिव्याप्तिरतस्तन्निवेशः। सत्यन्तदलप्रयोजनन्तु वह्निव्याप्याभावत्वद्वह्न्यभाववत्कालीनह्रदो वह्निव्याप्यवानित्यादौ वह्न्यभावव्याप्यवत्तादृशह्रदादावतिव्याप्तिवारणरूपमिति प्रागेवोक्तम्। न च सत्यन्तनिवेशेऽपि तादृशपक्षकस्थल एव वह्निव्याप्यवह्न्यभावव्याप्याभावोभयात्मकबाधे वह्न्यभावव्याप्यवत्तादृशपक्षेऽतिव्याप्तिरिति वाच्यम्। वह्न्यभावव्याप्याभावव्याप्यव्याप्याभावोभयवान् ह्रदो वह्निमान् इत्यत्र वह्न्यभावव्याप्यव्याप्यवद्ध्रदादावतिव्याप्तिवारकेण प्रतिबध्यत्वयोरेकरूपावच्छिन्नत्वनिवेशेनैव वारणसम्भवात्। एतेन-उन्नेयविषयितायां प्रतिबध्यत्वप्रतिबन्धकत्वयोरवच्छेदकत्वनिवेशे सत्यन्तदलेऽनुमित्यवृत्तित्व कुतो न निवेश्यताम्-इत्याशंकापि निरस्तेति दिक्॥ ५॥

अत्र सत्यन्तदले प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशे साध्याभावव्याप्यव्याप्यवत्ताज्ञानमपि समूहालम्बनसाध्यवत्ताज्ञानरूपसाध्याभावव्याप्याभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्ताज्ञानप्रतिबन्धकताया सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिरतस्तादृश-वैशिष्ट्यावगाहिग्रहत्वघटकसमुदायवृत्त्यवच्छेदकताकप्रतिबध्यता नि-वेशनीया, तथाच काञ्चनवद्ध्रदो वह्निमान् ह्रदो काञ्चनमयवह्निमा-नित्यादौ वह्न्यभावव्याप्यवद्ध्रदादिरूपसत्प्रतिपक्षाव्याप्तिस्तादृश प्रतिबध्यतावच्छेदकत्वस्य तादृशवैशिष्ट्यावगाहिताघटककाञ्चन यत्वविषयितायामसत्त्वादतस्तादृशानुमितित्वव्यापकप्रतिबध्यता वेश इति भट्टाचार्येणोक्तम् ॥

अथ पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यता दकावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिवेशेनैव तादृशसत्प्र क्षसङ्ग्रहः सम्भवति काञ्चनमयह्रदत्वावच्छिन्नविशेष्यतानिरूपि त्वावच्छिन्नप्रकारताया ह्रदत्वावच्छिन्नविशेष्यतानिरूपितकाञ्चनम वह्नित्वावच्छिन्नप्रकारतायाश्च ह्रदत्वावच्छिन्नविशेष्यतानिरूपित ह्नित्वावच्छिन्नप्रकारतात्वेन तत्प्रतिबध्यतावच्छेदकत्वात् । न हि दृशप्रकारतात्वावच्छिन्नावच्छेदकताकत्वं प्रतिबध्यतायां निवेश्य प्रयोजनाभावात् किं तादृशानुमितित्वव्यापकतानिवेशेनेति ॥ च ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्याभावात्मकवह्निमानि तिज्ञानीयवह्नित्वावच्छिन्नप्रकारताया अपि वह्न्यभावव्याप्याभावत्वा-वच्छिन्नप्रकारतात्वेन वह्न्यभावव्याप्यव्याप्यवत्तादृशनिश्चयप्रतिबध्य-तावच्छेदकता, अतः सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिरतस्तादृशप्रकार-तात्वावच्छिन्नावच्छेदकताकत्वनिवेशस्यावश्यकतया व्यापकतानिवेश-व्यावृत्तिसङ्गतिरिति वाच्यम् । प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्य-तानिरूपितसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारत्वावच्छिन्नत्व-स्य प्रतिबध्यताविशेषणतयैव सामञ्जस्यात् । न च तथापि ह्रदो वह्नि-मानित्यादौ वह्न्यभावव्याप्यव्याप्यवह्निघटोभयाभाववद्ध्रदादावति-व्याप्तिः एकत्र द्वयमितिरीत्या जायमान-वह्निघटवान् ह्रद इति-ज्ञा-नीयह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताया अ-पि घटत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतानिरूपि-तवह्नित्वावच्छिन्नप्रकारतात्वेन वह्निघटोभयाभावनिश्चयप्रतिब-ध्यतावच्छेदकत्वेन सत्यन्तदलस्य वन्ह्यभावव्याप्यघटितत्वात विशे-ष्यदलस्य च तत्र सत्त्वादित्यनुमितित्वव्यापकत्वनिवेशनमावश्यक-मिति वाच्यम् । साध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारत्वान्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकारत्वानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबध्यतानिवेशेनैव तद्वारणसम्भवात् । किञ्च सत्यन्तदलघटकप्रतिबध्यत्वोक्तेयदलप्रविष्टप्रतिबध्यत्वयोरेकरूपावच्छिन्नत्वनिवेशस्यावश्यकतया तेनैवोक्तातिव्याप्तिवारणसम्भवाच्च । एतेन—पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिवेशे ह्रदो वह्न्यभावव्याप्यव्याप्याभाववद्वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदादावतिव्याप्तिरतस्तद्वारणाय तादृशप्रकारतात्वावच्छिन्नावच्छेदकताकप्रतिबध्यतानिवेशश्चौव्ये ह्रदः काञ्चनमयवह्निमान् इत्यादौ वह्न्यभावव्याप्यवद्ध्रदादेरसङ्ग्रहभयात्तादृशानुमितित्वव्यापकत्वनिवेशः इति कैश्चिदुक्तमप्यपास्तम् । तत्रैरूपावच्छिन्नप्रतिबध्यतानिवेशेनैव वह्न्यभावव्याप्यव्याप्यवद्ध्रदादावतिव्याप्तेरसम्भवेन तादृशप्रकारतात्वावच्छिन्नावच्छेदकताकप्रतिबध्यतानिवेशस्याप्रयोजनकत्वात्, अन्यथा व्यापकत्वनिवेशेऽप्यसङ्ग्रहात् इति । प्रतिबध्यत्वद्वये एकरूपावच्छिन्नत्वनिवेशात् वह्न्यभाववज्जलवद्वृत्तिजलव्याप्याभाववद्ध्रदकालीनह्रदो वह्निमानित्यादौ वह्न्यभाववज्जलवद्वृत्तिजलव्याप्यवद्ध्रदेऽतिव्याप्तिस्तस्य व्यावर्तकप्रतिबध्यत्वं आश्रयासिद्धिप्रतिबध्यत्वं चादाय दलद्वयसत्त्वादिति पूर्वपक्षोऽपि निरस्त इति चेत् ।

अत्र केचित्—यत्र वह्निव्याप्यधूमवत्तापरामर्शाल्लाघवज्ञानवशेन काञ्चनमयवह्नितरवह्न्यभाववान् पर्वत इत्याकारकइतरबाधज्ञानवशेन वा काञ्चनमयवह्निमानित्यनुमितिर्जायते तत्र काञ्चनमयत्वाभावव्याप्यवद्वह्निरूपसत्प्रतिपक्षे साध्याप्रसिद्ध्याद्यनात्मकेऽव्याप्तिस्तज्ज्ञानप्रतिबध्यतावच्छेदककोटौ पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताया अनिवेशात् वह्नित्वावच्छिन्नविशेष्यतानिरूपितकाञ्चनमयत्वप्रकारताया एव तज्ज्ञानप्रतिबध्यतावच्छेदकत्वात् अतस्तादृशानुमितित्वव्यापकप्रतिबध्यतानिवेशनमावश्यकम् । न च व्यापकत्वनिवेशेऽपि काञ्चनमयत्वाभाववद्वह्निविषयकज्ञानस्य विशिष्टसाध्यग्रहविरोधित्वात् तदसङ्ग्रह इति वाच्यम् । व्यापकतावच्छेदकत्वेन गृहीतस्यैव विधेयतावच्छेदकत्वनियमेन काञ्चनमयत्वादेर्विधेयतावच्छेदकत्वाभावात् शुद्धवह्नित्वस्यैव विधेयतावच्छेदकत्वेन तद्विशिष्टग्रहाविरोधित्वेन तत्राक्षतत्वात् । सत्यन्तदले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु विधेयतावच्छेदकधर्मो न निवेश्यते किन्तु प्रकारतावच्छेदकधर्म ए-
वेति न सत्यन्तदलासत्त्वम् । काञ्चनमयत्वसहितवह्नित्वस्य विधेय-
तावच्छेदकत्वेन प्रकृतानुमितिजनकतावच्छेदकव्यापकत्वप्रकारतानि-
रूपितविशेष्यतावच्छेदकधर्मविशिष्टग्रहाविरोधित्वमेव विरोध्यन्तेन
विवक्षणीयमिति नानुपपत्तिः । एतेन पक्षतावच्छेदकत्वसाध्यतावच्छे
दकत्वयोर्न्यूनवारकपर्याप्तिमनिवेश्य पक्षतावच्छेदकावच्छिन्नविशेष्य
तानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिग्रहत्वपर्याप्ति
च्छेदकताकप्रतिबध्यता निवेशनीया । तथाच काञ्चनमयह्रदो
मान् ह्रदः काञ्चनमयवह्निमानित्यादौ ह्रदत्वावच्छिन्नविशेष्यतानि
तवह्नित्वावच्छिन्नप्रकारताशालिग्रहत्वे वह्न्यभावव्याप्यवद्ध्रद
यकनिश्चयप्रतिबध्यतावच्छेदकतापर्याप्तिसत्त्वात्तत्स्थलीयसत्प्रतिप
सङ्ग्रहसम्भवे व्यापकतानिवेशो व्यर्थ इत्यपि परास्तम् । उक्तरीत्
काञ्चनमयत्वाभावव्याप्यवद्वह्न्यादेरसङ्ग्रहापत्तेरिति ॥
अथैवं पर्वतोऽभावव्याप्यधूमाभाववानित्यादावभावव्याप्यधूमवत्पर्व
तात्मकबाधेऽतिव्याप्तिस्तादृशबाधविषयितायां प्रकृतसाध्यग्रहप्रति
बन्धकतावच्छेदकाभावव्याप्यधूमाभावाभावेतराभाववानितीतरबाध-
जन्य-पर्वतोऽभावव्याप्यधूमाभावाभाववान्-इत्याकारकानुमितिविष-
यित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वसत्त्वे-
नोक्तबाधस्य विशेष्यदलाक्रान्तत्वात्, एवं पर्वतो वह्निव्याप्याभा-
ववानित्यादौ वह्निव्याप्यवत्पर्वतरूपत्वाच्च वह्निव्याप्यवह्नीतराभा-
ववानितिबाधसहकारेण प्रकृतसाध्यवैशिष्ट्यग्रहविरोधिवह्निव्याप्यव-
द्धून्युन्नायकेऽतिव्याप्तिरिति । मैवम् । प्रकृतपक्षसाध्यवैशिष्ट्यग्रहप्र-
तिबन्धकतावच्छेदकविषयितात्वव्याप्यविषयितानिष्ठावच्छेदकताक-
जन्यतानिवेशेनैवोक्तातिव्याप्तिवारणसंभवात्—अभावव्याप्यधूमवान्
पर्वतः वह्निव्याप्यवान्पर्वतः इत्यादिपरामर्शजनकतावच्छेदकतायाः
शुद्धाभाववान् शुद्धवह्निमानित्याद्यनुमितिविषयतायामपि सत्त्वेन तत्र
निरुक्तप्रतिबन्धकत्वाभावादित्याहुः ॥

अन्ये तु गुणीयसंयोगेन वह्न्यादिसाध्यकस्थले गुणीयत्वाभा-
ववत्संयोगस्य बाधतया गुणीयत्वाभावव्याप्यवत्संयोगस्यापि सत्प्रति-
पक्षत्वम् । एतच्च सामान्यनिरुक्तिग्रन्थे जगदीशेनोक्तम् । एवं च ता-
दृशसत्प्रतिपक्षसंग्रहार्थमेवानुमितित्वव्यापकतानिवेश इति वदन्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परे तु पक्षतावच्छेदकत्वसाध्यतावच्छेदकत्वयोर्न्यूनवारकपर्याप्ति-
मानिवेश्य प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यग्रहत्वपर्याप्तावच्छेदकताकप्र-
तिबध्यतानिवेशे जातिमान्वह्निमानित्यत्र वह्न्यभाववद्ध्रदकालीनवह्न्य-
भावव्याप्यवज्जातिमत्यतिव्याप्तिः ह्रदत्वस्य जातित्वरूपेण पक्षताव-
च्छेदकत्वादिति तद्वारणाय पक्षतावच्छेदकतायाः पर्याप्तिनिवेशः ।
ह्रदो वह्निमानित्यादौ वह्न्यभाववज्जातिमत्कालीनवह्न्यभावव्याप्य-
व्याप्यवद्ध्रदादावतिव्याप्तिस्तज्ज्ञानप्रतिबध्यताकोटौ जातित्वरूपेण
ज्ञानावच्छिन्नविशेष्यतायाः प्रवेशादिति विशेष्यतावच्छेदकतायाः प-
र्याप्तिनिवेशः। एवं जातिर्जातिमतीत्यादौ वह्न्यभाववज्जातिकालीनजाति-
मद्भावव्याप्यव्याप्यवज्जातिरूपविशिष्टेऽतिव्याप्तिः–जातित्वरूपेण व-
ह्नित्वस्य साध्यतावच्छेदकत्वात् इति तद्वारणाय साध्यतावच्छेदक-
तायाः पर्याप्तिनिवेशः । जातिर्वह्निमतीत्यत्र जातिमदभाववज्जातिका-
लीनवह्न्यभावव्याप्यवज्जातिरूपविशिष्टेऽतिव्याप्तिः—जातिधर्मिक-
जातिमदभाववत्तानिश्चयप्रतिबध्यतावच्छेदककोटावपि जातित्वरूपेण
वह्नित्वावच्छिन्नप्रकारताया निवेशादिति तद्वारणाय प्रकारतावच्छे-
दकतायाः पर्याप्तिनिवेशः । तथाच पक्षतावच्छेदकतापर्याप्त्यधिकर-
णधर्मपर्याप्तावच्छेदकताकप्रकारताशालिग्रहत्वपर्याप्तावच्छेदकताकप्र-
तिबध्यतानिवेशे कांचनमयह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्र-
दादेरसङ्ग्रह इति तादृशानुमित्यव्यापकतानिवेशः इति। न च तादृश-
विशिष्टेऽतिव्याप्तिवारणाय साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मा-
वच्छिन्नविशेष्यतानिष्ठावच्छेकताकप्रतिबध्यता निवेश्यतां न तु तादृ-
शानुमितित्वव्यापकत्वमिति वाच्यम् । ह्रदो वह्निमानित्यादौ वह्निघटो-
भयवानिति प्रतिबन्धकज्ञानविषयवह्न्यभावव्याप्यव्याप्यघटविशि-
ष्टवह्न्यभाववद्ध्रदेऽतिव्याप्तिवारणाय सत्यन्तदलघटकप्रतिबध्यता-
याम्प्रकृतानुमितित्वव्यापकतानिवेशस्यावश्यकत्वात् । ननु तथापि
विशेष्यदलघटकप्रतिबध्यतायां पक्षविशेष्यतानिरूपितसाध्यप्रकारत्वा-
वच्छिन्नत्वमेव निवेश्यतां लाघवादिति चेन्न। घटविशिष्टवह्न्यभावव्या-
प्याभाववद्ध्रदकालीनह्रदो वह्निमानित्यादौ घटविशिष्टवह्न्यभाववद्ध्र-
दकालीनह्रदो वन्हिमानित्यादौ घटविशिष्टवह्न्यभाववद्ध्रदात्मका-
श्रयासिद्ध्यादावतिव्याप्तिः सामानाधिकरण्यरण्यसम्बन्धेन घटवि-
शिष्टवह्निमानित्याकारकज्ञानत्वावच्छिन्नप्रतिबध्यतामादायाश्रयासि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धिप्रतिबध्यतामादाय च दलद्वयसत्त्वादिति प्राहुः ॥

उन्नेये विरोध्यन्ताविशेषणं पर्वतो वह्निव्याप्याभाववानित्यादौ वह्निव्याप्यवत्पर्वतादिरूपबाधस्य वारकमिति दीधितिकृतैव वक्ष्यते। तत्र तादृशग्रहनिष्ठप्रतिबध्यतानिवेशे पर्वतो वह्निव्याप्याभाववान् वह्न्यभाववांश्चेत्याकारकसमूहालम्बनज्ञानविरोधिवह्निमत्पर्वताद्युन्नायके उक्तबाध एवातिव्याप्तिस्तादृशग्रहत्वावच्छिन्नप्रतिबध्यतानिवेशे च उक्तदिशैव दोषः स्यादिति तत्रापि तादृशग्रहत्वव्यापकप्रतिबध्यता निवेशनीया इति। अत्रोन्नेयोन्नायकोभयत्राविरोध्यन्तकप्रतिबध्यतायामेकरूपावच्छिन्नत्वनिवेशकल्पे तु सत्यन्तदल एव तादृग्रहत्वव्यापकप्रतिबध्यतानिवेशो बोध्यः न तून्नेयदलेपि, एकरूपावच्छिन्नप्रतिबध्यतानिवेशे सत्यन्तदले तादृशग्रहत्वव्यापकप्रतिबध्यतानिवेशेनैवार्थादुन्नेयदलेपि व्यापकतानिवेशकार्यनिर्वाहादित्यवधेयम् ॥

विशिष्टसाध्यपक्षग्रहविरोधित्वशरीरे तादृशग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकत्वनिवेशे च काञ्चनमयह्रदो वह्निमानित्यादिस्थलीयबाधग्रहस्यानुमितिविशिष्टपक्षग्रहविरोधितया तत्स्थलीयसत्प्रतिपक्षाव्याप्तितादवस्थ्यमिति विशिष्टपक्षादिग्रहत्वव्यापकतानिवेश इत्युक्तं भट्टाचार्येण।

बाधलक्षणवदत्रापि उन्नेयदले पक्षसाध्यग्रहाविरोधित्वमित्यनेनैव उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तप्रकृतपक्षे प्रकृतसाध्यैवशिष्ट्यावगाहिविरोधीयविषयतान्तःपातिप्रकारत्वावच्छिन्नत्वमेव प्रतिबध्यतायां निवेशनीयम्, तेन वह्निमान्ह्रदो वह्निमानित्यादौ प्रकृतपक्षग्रहविरोधिवह्न्यभाववद्ध्रदाद्युन्नायके सत्प्रतिपक्षे नाव्याप्तिः।

वस्तुतो वह्न्यभावव्याप्याभाववद्वह्न्यभाववद्ध्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्रदात्मकसत्प्रतिपक्षसङ्ग्रहार्थमेवोक्तप्रकारश्चिन्तनीयः। तत्र वह्न्यभावव्याप्यव्याप्यवद्ध्रदात्मकाश्रयासिद्ध्युन्नायकेतिव्याप्तिवारणाय पक्षग्रहाविरोधित्वनिवेशस्यावश्यकत्वात्। एतेन लक्ष्यभेदेन लक्षणस्य नानात्वाद्यत्र सत्प्रतिपक्ष एव विशिष्टपक्षग्रहविरोध्युन्नायकस्तत्रोन्नेयदले नादेयमेव पक्षग्रहाविरोधत्वविशेषणमित्युक्तावपि न निस्तार इति ध्येयम्।

यत्तु महानसीयवह्न्यभाववान् ह्रदो वह्न्यभावव्याप्याभाववान् इत्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदात्मकसत्प्रतिपक्षसंग्रहायोक्तप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारानुसरणम्। तत्र महानसीयवह्न्यभावव्याप्यवद्ध्रदात्मकाश्रयासिध्युन्नायकवारणाय पक्षग्रहाविरोधित्वानिवेशस्यावश्यकत्वादिति ।

तत्तुच्छम् । प्रतिबध्यताया पक्षग्रहत्वव्यापकत्वनिवेशेनैवोक्तातिव्याप्तिवारणसंभवे तत्रोक्तप्रकारानुसरणवैफल्यापत्तेः । अत्र एकत्र द्वयमिति रीत्या वह्न्यभाववह्न्यभावव्याप्यव्याप्यवान् ह्रद इति ज्ञानमादाय दो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदे चातिव्याप्तिवारणाप्रतिबन्धकताया जनकतायाश्चानतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं शितं भट्टाचार्येण । तच्च यथाश्रुताभिप्रायेण ।

वस्तुतस्तु अव्यापकीभूतविषयिताशून्यत्वनिवेशस्यावश्यकतया दृशज्ञानमादाय दोषो न संभवत्येव, किन्तु वह्न्यभावव्याप्यव्याप्यवकालीनह्रदो वह्निमानित्यादौ एकत्र द्वयमिति रीत्या वह्न्यभाववह्न्यभावव्याप्यवान् तादृशह्रद इति ज्ञानमादाय वह्न्यभाववत्तादृशरूपधेऽतिव्याप्तिवारणाय जनकतायामनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं ग्राह्यम् तादृशज्ञाने ह्रदवृत्तिवह्न्यभावव्याप्यव्याप्यवस्तुनो ह्रदे भानादव्यापकीभूतवह्न्यभावव्याप्यव्याप्यवद्ध्रदादीविषयिताशून्यत्वसत्त्वात् । एवं वह्न्यभावव्याप्यकालीनह्रदो महानसीयवह्निमानित्यादौ वह्न्यभावव्याप्यमहानसीयवह्न्यभाववान् तादृशह्रद इति ज्ञानविषये महानसीयवह्न्यभाववत्तादृशह्रदेऽतिव्याप्तिवारणायाप्यनतिरिक्तवृत्तित्वरूपं जनकतावच्छेदकत्वं वाच्यम् उक्तज्ञानविषयीभूतवह्निसामान्याभावव्याप्यमहानसीयवह्न्यभावरूपन्तु विशिष्टमप्रसिद्धम् । एवं यादृशयादृशविशिष्टं प्रसिद्धं तद्विषयित्वं तु दोषत्वेनाभिमतस्य विषयिताया व्यापकमेव इत्यव्यापकीभूतविषयिताशून्यस्यापि तत्र सत्त्वात्पर्वतो वह्न्यभाववानित्यादौ एकत्र द्वयमिति रीत्या वह्निव्याप्यव्याप्यवान्पर्वत इति ज्ञानमादाय वह्निव्याप्यव्याप्यवत्पर्वतरूपसत्प्रतिपक्षोन्नायकेऽतिव्याप्तिवारणाय प्रतिबन्धकतावच्छेकत्वमनतिरिक्तवृत्तित्वरूपं ग्राह्यम् । तादृशज्ञाने वह्नित्वेन पर्वतवृत्तिवह्नेर्भानात् अव्यापकीभूतविषयिताशून्यत्वात् इति । यद्यपि यद्रूपावच्छिन्नविषयितासामान्ये प्रतिबन्धकत्वजनकत्वयोः स्वरूपसम्बन्धरूपावच्छेदकत्वविवक्षयैवोक्तदोषवारणसंभवेऽनतिरिक्तवृत्तित्वनिवेशनमफलम् । तथापि ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवान् वह्न्यभाववान् वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इति ज्ञानीयज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतया वह्न्यभावव्याप्यव्याप्यवद्ध्रदविषयितासामान्ये सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः हेतुतावच्छेदकघटितसत्प्रतिपक्षाव्याप्तिभिया प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशायोगात्। हेतुतावच्छेदकघटितसत्प्रतिपक्षश्च सङ्गृह्यते चेत्यादिना दीधितिकारेण दर्शितः। एवं प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेऽसाधारण्यवारकदीधितिकारोक्तसाध्यव्यापकीभूताभावप्रतियोगित्वानवगाहित्वविशेषणञ्च व्यर्थमिति प्रतिबन्धकतातवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपमावश्यकम्। एवं जनकतावच्छेदकमपि तादृशमेव, अन्यथा स्वमते प्रतिबन्धकत्वकत्वोभयस्मिन् यादृशविशिष्टविषयिताव्यापकतायाः सकृन्निवेशाक्षया भवन्मते प्रतिबन्धकत्वे यादृशविशिष्टविषयिताव्यापकत्वस्य जनकतावच्छेदकत्वे यादृशविशिष्टविषयितात्वव्यापकत्वस्य निवेशे व्यापकताया द्विधा निवेशे महागौरवादिति। एतेन पक्षसाध्यवैशिष्ट्यग्रहप्रतिबन्धकतावच्छेदकविषयिताकत्वरूपविरोधित्वान्तार्थस्य न्नायकविशेषणत्वे विषयिताभागस्य द्विधा निवेशेन गौरवादुन्नायकताघटकविषयितायामेव प्रतिबन्धकतावच्छेदकत्वं निवेशितम् भट्टाचार्येण। तन्न सङ्गच्छते। उक्तरीत्याऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशस्यावश्यकत्वे तदर्थश्च सामान्यलक्षणोक्तदोषात्प्रतिबन्धकत्वनिष्ठतादृशविषयिताव्यापकत्वं जनकतानिष्ठतादृशरूपावच्छिन्नविषयित्वव्यापकत्वञ्च पर्यवस्यति, तथा चात्र विषयिताभागस्य द्विधा निवेशादिति ध्येयम्॥

एवमुन्नेयदलप्रविष्टं प्रतिबन्धकतावच्छेदकत्वमपि अनतिरिक्तवृत्तित्वरूपमेव न तु स्वरूपसम्बन्धविशेषः, तथासति पर्वतविशेष्यकवह्निव्याप्याभावप्रकारकज्ञानप्रतिबन्धकतावच्छेदकीभूतं यद्वह्निमान् वह्निव्याप्याभावाभाववान् वह्निमांश्च पर्वत इति ज्ञानीयवह्निमत्पर्वतविषयित्वं तदवच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताकवह्निव्याप्यवत्पर्वतात्मके पर्वतो वह्निव्याप्याभाववन्ह्यभावव्याप्योभयवानित्यादिस्थलीयबाधेऽतिव्याप्तिः। ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशे च गगनाभाववदभाववत्कालीनगगनसाध्यकसत्प्रतिपक्षाव्याप्तिरिति ध्येयम्।

असाधारणविरुद्धयोरन्यतरस्य प्रतिपक्षविधया दोषत्वपक्षे प्रकृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधने प्रकृतसाध्यव्यापकाभावप्रतियोगित्वाद्यनवगाहिपरामर्शो ग्राह्य इति शिरोमणिः । तथाच प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नाभावव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिपरामर्शनिष्ठानुमितिजनकतावच्छेदकविषयिताकत्वमुन्नायकत्वं विवक्षणीयमित्यर्थः । रूपान्तरेण प्रकृतहेतोर्यत्र व्यतिरेकिहेतुता तत्स्थलीयप्रतिपक्षस्य सङ्ग्रहाय प्रकृतसाधनतावच्छेदकनिवेशः । रूपान्तरावच्छिन्नव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतहेतुमत्पक्षकालीनत्वं यत्र प्रकृतसाध्यतावच्छेदकघटकता तत्स्थलीयसाध्यतावच्छेदकविशिष्टसाध्याभावव्याप्यवत्पक्षात्मकप्रतिपक्षसंग्रहाय प्रकृतसाध्यतावच्छेदकनिवेशः । प्रकृतसाध्यव्यापकाभावप्रतियोगित्वविशिष्टसाधनवत्त्वेन रूपान्तरावच्छिन्नपक्षस्य प्रकृतपक्षतावच्छेदके प्रवेशः तत्रत्यप्रतिपक्षस्य तादृशपक्षतावच्छेदकविशिष्टे साध्याभावव्याप्यरूपस्य सङ्ग्रहाय प्रकृतपक्षतावच्छेदकनिवेश इति भट्टाचार्येणोक्तम् ।

अथात्र पक्षतावच्छेदकादौ प्रकृतत्वनिवेशे तद्ध्रदपक्षकस्थले तद्वह्निसाध्यकस्थले तज्जलहेतुकस्थले च वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदात्मकासाधारण्येऽव्याप्तिरिति चेन्न । प्रकृतपक्षतावच्छेदकाद्यवगाहित्वपदेन प्रकृतपक्षतावच्छेदकातिरिक्तधर्मानवच्छिन्नविषयितानिवेशात् । न चैवं वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदकालीनह्रदो वह्निमान् जलादित्यादौ वह्न्यभावव्याप्यवत्तादृशह्रदरूपसत्प्रतिपक्षेऽव्याप्तिः-ह्रदत्वसामानाधिकरण्येन तादृशजलावगाहनेनाहार्यत्वाभावादिति वाच्यम् । सामानाधिकरण्येन साध्यकस्थले पक्षतावच्छेदकाद्यतिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपिततादृशविशेष्यतावच्छेदकव्यापकप्रतियोगिकहेतुतावच्छेदकसंसर्गावच्छिन्नावगाहित्वाभावनिवेशेनाव्याप्त्यनवकाशात् । न चोक्तस्थले तादृशह्रदत्वावच्छेदेन साध्यतायां सत्प्रतिपक्षाव्याप्तितादवस्थ्यम् , अवच्छेदकावच्छेदेन साध्यतास्थलेऽप्युक्तरीत्या अवच्छेदकावच्छेदेनावगाहित्वाभावनिवेशे च सामानाधिकरण्येनासाधारण्येऽतिव्याप्तिरिति वाच्यम् । अवच्छेदकावच्छेदेन साध्यकस्थले उक्तरीत्या अवगाहित्वाभावस्यैव सामानाधिकरण्येनातिव्याप्तिवार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णार्थं पुनः पक्षतावच्छेदकावच्छिन्ने साध्यव्यापकाभावप्रतियोगि-
हेतुमत्तागाहित्वाभावस्यापि स्वातंत्र्येण निवेशनीयत्वात्। तत्प्र-
तियोगिकोटौ च पक्षविषयताया एव प्रकृतपक्षतावच्छेदकाव-
च्छिन्नत्वेन निवेशः। साध्यादिविषयतायाश्च पूर्ववत् साध्यताव-
च्छेदकाक्तातिरिक्तधर्मानवच्छिन्नत्वेनैव निवेशः। तेन ह्रदत्वावच्छेदे
महानसीयवह्न्यादेः साध्यतायां ह्रदत्वसामानाधिकरण्येन व
व्यापकीभूताभावप्रतियोगिजलवद्ध्रदादौ नातिव्याप्तिरिति ध्येय
अथ तथापि पक्षतावच्छेदके प्रकृतत्वनिवेशे सर्वं वहि
लादित्यादौ वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदात्मकास
रण्येऽतिव्याप्तिः-सर्वत्वावच्छेदेन वह्निमत्तावुद्धिं प्रति किञ्चिद्ध
वच्छिन्नविशेष्यकवह्न्यभावत्तावुद्धेरिव वह्निव्यापकीभूताभावप्र
योगिजलवत्ताज्ञानस्यापि प्रतिबन्धकत्वादिति चेन्न। साध्यसा
नादिभेदेन लक्षणस्य भेदात्। सर्वपक्षकस्थले पक्षतावच्छेदक
निवेश्य किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितताद्दशप्रतियोगित्वनि
शिष्टविषयताशून्यत्वनिवेशेनैव दोषाभावादिति ध्येयम्॥

अथासाधारण्यस्यातिव्याप्तेरवश्यनिवेशनीयविशिष्टद्वयाघटित-
त्वनिवेशेनैव तद्वारणसंभवात् प्रकृतसाधने प्रकृतसाध्यव्यापकाभा-
वप्रतियोगित्वाद्यनवगाहित्वनिवेशनं व्यर्थम् इति। न च विशिष्ट-
द्वयाघटितत्वनिवेशस्य कथमावश्यकतेति वाच्यम्। वह्न्यभाववद्ह्रद-
भावव्याप्यव्याप्यवत्कालीनवह्न्यभावव्याप्यव्याप्यवद्ध्रदादौ अति-
व्याप्तिवारणार्थमेव तस्यावश्यकत्वात्। नचैवं सत्प्रतिपक्षेऽव्या-
प्तिः तस्य ताद्दशविशिष्टद्वयघटितत्वादिति वाच्यम्। विशिष्टद्वयाघ-
टितत्वप्रविष्टविशिष्टद्वयविषयितायां सत्प्रतिपक्षघटकविशिष्टद्वय-
विषयिताभेदस्यागत्या निवेशनीयत्वादिति चेत्।

अत्राहुः-यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविषयकनिश्च-
यत्वं ताद्दशजनकतानतिरिक्तवृत्ति ताद्दशविशिष्टद्वयाघटितत्वमेव ताद्द-
शविशिष्टद्वयाघटितत्वपदेनात्र विवक्षणीयम्, अन्यथा जनकतानतिरि-
क्तवृत्तित्वमनिवेश्य केवलप्रतिबन्धकतानतिरिक्तवृत्तित्वघटितविशिष्ट-
द्वयाघटितत्वनिवेशे जलवान् वह्न्यभाववान् जलवांश्च ह्रद इत्यादिज्ञानस्य
नानाविधविषयतानां प्रतियोगिकोटौ निवेशनेन गौरवम् अन्वयव्यतिरे-
कव्याप्तिघटितसत्प्रतिपक्षसाधारणासाधारणव्यावृत्तस्य सत्प्रतिपक्षत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य दुर्वचतया सत्प्रतिपक्षविषयिताबहिर्भूतत्वनिवेशायोगश्च, तस्य सुवचत्वे तु तस्यैव लक्षणत्वलंभवे एतत्प्रयासवैफल्यात् । स्वमते तु सत्प्रतिपक्षात्मकविशिष्टमादाय दोषस्तु सामान्यनिरुक्तिपत्रिकोक्तदिशा वारणीय इति ध्येयम् ॥

अथात्र लक्षणे ह्रदो वह्निमानित्यादौ वह्न्यभाववह्न्यभावव्याप्यव्याप्यउभयवद्ध्रदेऽतिव्याप्तिः तद्विषयताया वह्निमद्ध्रदविषयकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वात्, तादृशत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतवह्न्यभावव्याप्यवद्ध्रदत्वावच्छिन्नविषयित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वाच्च । न च सत्यन्तघटकप्रतिबन्धकतायां तादृशजनकतावच्छेदकविषयितात्वव्यापकावच्छेदकत्वनिवेशान्नोक्तातिव्याप्तिः तादृशजनकतावच्छेदकीभूतवह्न्यभावव्याप्यव्याप्यवद्ध्रदविषयितायास्तादृशप्रतिबन्धकतावच्छेदकत्वादिति वाच्यम् । प्रतिहेतुव्यापकत्वघटितसत्प्रतिपक्षेऽव्याप्तेर्जनकतावच्छेदीभूतसामानाधिकरण्यविषयितायाः प्रतिबन्धकतानवच्छेदकत्वात् । सत्यन्तदलघटकप्रतिबन्धकतायां तादृशजनकतावच्छेदकविषयितावच्छेदकत्वनिवेशे च यत्र सत्प्रतिपक्षघटको बाधस्तत्र साध्याभावव्याप्यसाध्याभावोभयवत्पक्षेऽतिव्याप्तिः । न च बाधघटितस्य सत्प्रतिपक्षत्वं न स्वीक्रियते तद्घटकबाधेनैव तत्कार्यनिर्वाहात्, ह्रदः समानाधिकरणजलाभाववानित्यादौ जलव्यापकसमानाधिकरणजलसमानाधिकरणजलवद्ध्रदात्मकबाधघटितसत्प्रतिपक्षसम्भवेऽपि तादृशसत्प्रतिपक्षोन्नायकबाधोभयात्मके नातिव्याप्तिः तादृशसत्प्रतिपक्षविषयिताया बाधविषयितानियतत्वेऽपि तादृशसत्प्रतिपक्षोन्नायकविषयिताया बाधविषयिताशून्यवृत्तित्वेन बाधविषयितानियतत्वाभावात्, सामान्याभावसाध्यकस्थले सामान्यघटितविशेषधर्मावच्छिन्नव्याप्यवत्पक्षस्यापि सत्प्रतिपक्षत्वेन लक्ष्यतया जलव्यापकसमानाधिकरणजलव्याप्यवत्पक्षस्यापि सत्प्रतिपक्षतया विशिष्टान्तराघटितत्वविरहाच्चेति वाच्यम् । जलं अवृत्ति इत्यत्र जलव्यापकवृत्तित्वसमानाधिकरणजलव्याप्यवृत्तित्वोभयवज्जले ह्रदो वह्निमानित्यादौ वह्न्यभावव्यापकवह्न्यभावसमानाधिकरणवह्न्यभाववद्ध्रदादौ चातिव्याप्तेस्तथापि दुर्वारत्वात् । एतेन सत्यन्तघटकप्रतिब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्धकतायां तादृशजनकतावच्छेदकीभूतमुख्यविशेष्यतात्वव्यापका-
वच्छेदकताकत्वनिवेशे सत्प्रतिपक्षोन्नायकबाधोभयात्मके नातिव्या-
प्तिरित्यपि प्रत्युक्तम्-ह्रदो वह्निमानित्यादावुक्तातिव्याप्तेरपरीहारात्।
अत एव स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकप्रकृतानुमि-
तिप्रतिबन्धकतावच्छेदकविषयितावच्छेदकरूपावच्छिन्नजन्यतानिरू-
पितजनकतावच्छेदकीभूतविषयितानिरूपकतावच्छेदकधर्मावच्छि-
घटितत्वनिवेशात् वह्न्यभावव्याप्यव्याप्यवह्न्यभावोभयवद्ध्रदादौ
तिव्याप्तिः स्वावच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकतादृशज-
तावच्छेदकीभूतवह्न्यभावव्याप्यव्याप्यवद्ध्रदत्वावच्छिन्नघटितत्व
त्युक्तावपि न निस्तारः। ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्य
द्ध्रदादावुक्तातिव्याप्तेस्तादवस्थ्यात्। ह्रदो वह्न्यभावव्याप्यव्याप्य
द्ध्रदकालीनवह्निमानित्यादौ तादृशवह्न्यभावव्याप्यवद्ध्रदात्मकस
त्प्रतिपक्षे निरुक्तविशिष्टान्तराघटितत्वविशेषणेऽव्याप्त्यापत्तेश्च।
चोन्नेयविषयितायां प्रागुक्तयुक्त्या प्रकृतानुमितिप्रतिबन्धकतावच्छेदक
त्वस्यापि निवेशितत्वेन उक्तातिव्याप्तीनां प्रसक्तिरेव नेति वाच्यम्
तावतापि वह्निव्याप्याभाववद्वह्न्यभाववत्कालीनवह्निव्याप्यवान् इत्या-
दिप्रागुक्तस्थल एव वह्न्यभावव्याप्याभावोभयवद्ध्रदे वह्न्यभाव-
व्याप्यव्याप्याभाववद्ध्रदे चातिव्याप्तेर्दुर्वारत्वादिति चेत्।

अत्र ब्रूमः—मेयत्वविशिष्टसत्प्रतिपक्षेऽतिव्याप्तिवारणाय सत्यन्त-
दलघटकप्रतिबन्धकतायां विशिष्टान्तरविषयकत्वानवच्छिन्नत्वमवश्यं
निवेशनीयम्। तदर्थश्च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदक-
त्वे सति स्वघटकतावच्छेदकं यद्रूपं स्वावच्छिन्नविषयकत्वव्यापकत्व-
सम्बधेन तद्रूपाविशिष्टान्यत्वं, तथाच साध्याभावव्याप्यव्याप्यसाध्या-
भावोभयवत्पक्षादौ साध्याभावव्याप्यव्याप्यसाध्याभाववत्पक्षादौ च
नातिव्याप्तिसंभवः। तत्तद्विशिष्टविषयकज्ञाननिष्ठप्रतिबन्धकतायां स्वा-
वच्छिन्नाविषयकज्ञाननिष्ठप्रतिबन्धकतायां स्वाच्छिन्नाविषयकप्रतीति-
विषयताच्छेदकस्वघटकतावच्छेदकं यद्बाधत्वं तद्विशिष्टान्यत्वाभावात्।
बाधघटितसत्प्रतिपक्षे च बाधप्रतिबन्धकताभिन्नव्याप्यवत्तानिश्चय-
त्वावच्छिन्नप्रतिबन्धकतान्तरमस्तीति तामादायैव च लक्षणसमन्वयः।
स्वघटकतावच्छेदकत्वेन विशेषणात् प्रतिहेतुव्यापकताघटितसत्प्रति-
पक्षज्ञानीयप्रतिबन्धकतायाः प्रतिहेतुव्यापकसाध्याभावसमानकाली-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नत्वादिघटितविशिष्टविषयकत्वव्यापकत्वेऽपि तत्र नाव्याप्तिरिति ध्येयम् ॥

केचित्तु विशिष्टान्तराघटितत्वविशेषणेनैव उक्तस्थले नातिव्याप्तिः, तथाहि–विशिष्टान्तराघटितत्वं विशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्नस्वावच्छिन्नविषयितानिष्ठप्रयोजकताकप्रयोज्यतावत्प्रकृतसाध्ये प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताकत्वम् । विशिष्टान्तरं च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकप्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकधर्मवत्त्वम्। तच्च वह्न्यभावव्याप्यव्याप्यवह्न्यभावोभयवद्ध्रदादौ वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ध्रदादौ च नातिव्याप्तिः–तादृशह्रदत्वावच्छिन्नविषयितानिष्ठायाः साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकतायास्तादृशविशिष्टान्तरवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वरूपावच्छिन्नत्वात् । न च वृत्तित्वं निरूपितत्वाभाववदित्यादौ अभाववदवृत्तित्वघटितसत्प्रतिपक्षे जलमधिकरणत्वाभाववदित्यादौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटितसत्प्रतिपक्षे चाव्याप्तिस्तयोर्बाधघटितत्वेऽपि तद्विषयितानिष्ठप्रयोजकतायास्तादृशबाधविषयितात्वव्यापकरूपानवच्छिन्नत्वात् । न चैवं प्रतिहेतुव्यापकताघटितसत्प्रतिपक्षे विषयितानिष्ठप्रयोजकतायास्तादृशविशिष्टान्तरप्रतिहेतुमत्पक्षविषयितात्वव्यापकरूपावच्छिन्नत्वादतिव्याप्तिरिति वाच्यम् । तादृशविशिष्टान्तरविषयकप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयताविशिष्टान्यत्वसाध्याभावधर्मिकप्रतिहेतुव्यापकतानिश्चयघटकधर्मावच्छिन्नप्रयोजकत्व उभयाभाववत्त्वविशेषणेनैव तद्वारणात् । विषयितावैशिष्ट्यं च स्वनिरूपितत्वस्वतादात्म्यान्यतरसम्बन्धेन। मेयत्वविशिष्टप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणहेतुमत्पक्षेऽतिव्याप्तिवारणाय वैशिष्ट्यघटकसम्बन्धे निरूपितत्वान्तर्भावः। मेयत्वपक्षवृत्तिप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतावतिव्याप्तिवारणाय तादात्म्यनिवेश इत्याहुः ।

तन्मन्दम् । उक्तरीत्या विशिष्टान्तराघटितत्वनिवेशे ह्रदः समानाधिकरणजलाभाववानित्यादौ जलव्यापकसमाधिकरणजलसमानाधिकरणजलवद्ध्रदात्मकसत्प्रतिपक्षेऽव्याप्तेस्तादृशसत्प्रतिपक्षविषयितानिष्ठप्रयोजकतायाः समानाधिकरणजलवद्ध्रदात्मकतादृशविशिष्टा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरविषयितात्वव्यापकरूपावच्छिन्नत्वात्। न च यद्रूपेण प्रतिबन्धकतावच्छेदकता तद्रूपेणैव प्रयोजकतयैव सत्प्रतिपक्षविषयितायाः प्रतिबन्धकतावच्छेदकत्वं प्रतिहेतुव्यापकसाध्याभावनिश्चयकालीनज्ञानीयप्रतिहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतात्वेनैव तस्य च निरुक्तबाधविषयतात्वव्यापकत्वविरहेणाव्याप्तिविरह इति वाच्यम् समानाकारकज्ञानीयविषयताया ऐक्येन प्रतिहेतुव्यापकतानिश्चयकालीननिश्चयविबाधविषयत्वयोरभेदात् प्रतिहेतुव्यापकतानिश्चयकालीनप्रतिहेतुमत्पक्षविषयतात्वे निरुक्तबाधविषयतात्वव्यापकत्वरक्षतत्वात्, अन्यथा सत्प्रतिपक्षघटकहेतुमत्पक्षविषयताप्रकारकतावच्छिन्नप्रयोजकत्वाप्रसिद्धयैवाव्याप्तिवारणसम्भवे सत्प्रतिपक्षस्य कहेतुमत्पक्षस्य विशिष्टान्तरत्ववारकस्य विशिष्टान्तरत्वशरीरे अवमितिप्रतिबन्धकतावच्छेकत्वानिवेशस्य वैयर्थ्यापत्तेः। अत एव विशिष्टान्तराघटितत्वं स्वविषताप्रयोज्यविशिष्टान्तरविषयत्वाप्रयोज्यप्रकृतपक्षसाध्यवैशिष्ट्यम् विशिष्टान्तरं च पूर्वोक्तमेव। विशिष्टान्तरविषयतानिष्ठप्रयोजकत्वं प्रागुक्तान्यतरसम्बन्धेन प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणहेतुविषयतावैशिष्टान्यविषयतावृत्तित्वप्रतिहेतुव्यापकतानिश्चयघटितधर्मावच्छिन्नत्वोभयाभाववत्त्वेन विशेषणीयम्। तेन प्रतिहेतुव्यापकसाध्याभावकालीनत्वादिघटितविशिष्टान्तरमादाय न पूर्वोक्ताव्याप्तिः। एवं चोक्तविशिष्टान्तराघटितत्वविरहादेव बाधसत्प्रतिपक्षोन्नायकोभयात्मकादौ न प्रागुक्तातिव्याप्तिरिति प्रलपितमप्यपास्तम्। बाधघटितसत्प्रतिपक्षेऽव्याप्तेर्वज्रलेपत्वादित्यलं वाग्जालेनेति॥

इति श्रीकालीशङ्करसिद्धान्तवागीशविरचितं सत्प्रतिपक्षप्रकरणम्॥

समाप्तोऽयं गादाधरीक्रोडपत्रसङ्ग्रहः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़ पुस्तकमालाः ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) वर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

मुद्रितग्रन्थनामानि । रु. आ. पा.

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) १—८—०

२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) १०-०—०

३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् । (वैशेषिकं १) ३—८—०

४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् (वैदिकं १) ०—६—०

५ लघुशब्देन्दुशेखरः चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १) १०-०—०

६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपण" दिनकरीय महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रीव्याख्यासहिता । (न्यायं १) ६—०—०

७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) ०—८—०

८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १) ०—८—०

९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) ०—१२-०

१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । [ज्यो० १] २-०-०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र मुद्रितग्रन्थनामानि रु. आ. पा.

११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । [कर्म० १] ०—८—०

१२ पुरुषसूक्तम् । सायणभाष्य-महीधर-भाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) १—४—

१३ श्रीमत्सनत्सुजातीयम्-श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । [वि०३] १—४—

१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदास-वि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) २—०—

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः [छंदः १] ०—६—०

१६ कारिकावली मुक्तावली-न्यायचन्द्रिका-टीकाद्वयसहिता सटिप्पणा । (न्याय २) १—०—०

१७ पारस्करगृह्यसूत्रं हरिहरभाष्य-गदाधरभाष्यद्वयसहितम् । (कर्मकाण्डं २) २—४—०

१८ संक्षेपशारीरकम्-मधुसूदनीटीका भाग १ (वेदान्तं ४) ५—०—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिर्निर्मितिः । ०—८—०

२० कातीयोष्टदीपकः । (दर्शपौर्णमासपद्धतिः) १—०—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् (स्तोत्रवि०) १—०—०

२२ बौद्धाऽऽचार्य श्रीधर्मकीर्तिप्रणीतः सटीक-न्यायबिन्दुः भाषाटीकासहितः (बौद्धन्याय वि० १) १—८—०

२३ सपरिष्कृत दर्पणसहित वैयाकरणभूषण-सारः (व्याकरणं वि० ३) ४—०—०

पत्रादिप्रेषणस्थानम्
१० नवम्बर १९२४.

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर लेन,
बनारस सिटी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO'S. 285, 293, 309 & 324.

क्रोडपत्रसङ्ग्रहः ।

अत्र

श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि

अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्याः व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ।

KRODAPATTRASANGRAHA

or Critical Notes

On Anumânajâgadîsî, Pratyakshânumânagâdâdhari, Pratyakshânumânamâthurî, Vyutpattivâda, Śaktivâda, Muktivâda, Śabdaśaktiprakâśikâ and Kusumânjalî

By Kâlisankara Siddhânta Vâgîsa.

Edited by

Mahamahopadhyaya Nyâyâchârya Vâmâcharana Bhattâchârya,
Professor, Govt. Sanskrit College, Benares,
and P. Dhundiraj Shâstri, N. U., K. T.

VOL. II FASCICULUS IV-V.

PUBLISHED & SOLD BY THE SECRETARY
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1924.

Copyright 1867. (All Rights Reserved.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेष-सूचना ।

हमारे यहां हर तरह की संस्कृत पुस्तकें मै भाषा टीका के हरवक्त तैय्यार रहती हैं इसके अलावे हर तरह की छपाई तथा जिल्द के बंधाई का कार्य भी होता है ।

नीचे लिखे पते पर पत्र व्यवहार करें ।

जयकृष्णदास-हरिदासगु

चौखम्बा संस्कृत सीरीज आफीस ।

विद्याविलास प्रेस, गोपालमंदिर लेन

बनारस सिटी ।

77027

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu